नं- ८५५८
मिताक्षरार्थ संग्रह
(पाणिनीय सूत्रार्थ)
-३८ पत्राणि
६ अध्याय पर्यन्त

उदयन



पुस्तकमेतद् धननाथस्य ठक्कुरस्य
मिताक्षरार्थसंग्रह षष्ठाध्यायपर्यन्तम्॥
३



षति

श्रीगणेशाय नमः॥ एकाचो द्वे प्रथमस्य॥ अधिकारसूत्रम्॥१॥ अजादेर्द्वितीयस्य॥ अयमप्यधिका
रः॥२॥ नन्द्राः संयोगादयः॥ अचः पराद्वे॥ इन्द्रिद्विषि॥ अद्रिरीयीषति॥ येनार्द्रिद्वर्द्वे त्यपुरं पिनाकी॥३॥
पूर्वोभ्यासः॥ इतस्त्रीणि संज्ञासूत्राणि॥ पूर्वं इति द्विर्त्वे सति पूर्वभाग इत्यर्थः॥ प्रयोजनन्तु विधिप्रदेशे
४॥ उभे अभ्यस्तम्॥ उभे इति द्वित्वे सति भागद्वयमपीत्यर्थः॥५॥ जक्षित्यादयः षट्॥ अभ्यस्तम्॥ जक्षित्या
दय इत्यतद्गुणसंविज्ञानो बहुव्रीहिः॥ तेन सप्तमो जक्षितिरपि गृह्यते॥ जक्षि जागृ दरिद्रा शास दीधीङ् वेवीङ्
चकासृ तथा॥ जक्षादयः॥६॥ तुजादीनान्दीर्घोभ्यासस्य॥ इन्द्रायाहि हि तुजान॥ मामहानस्तमः मणीतम्॥ दा
धार पृथिवीम्॥ स्तत्तथा॥ आकृतिगणोयं॥७॥ लिटि धातोरनभ्यासस्य॥ एकाचो द्वे प्रथमस्याजादेर्द्वितीयस्य
बभूव॥ बभूवतुः॥ ऊर्णुनाव॥ ऊर्णुनुवतुः॥८॥ सन्यङोः॥ धातोरनभ्यासस्यैकाचो प्रथमस्याजादेर्द्वितीयस्य
चिकीर्षति॥ अरिरिषति॥ देदीप्यते॥ अटाट्यते॥९॥ चङि॥ धातोरनभ्यासस्यैकाचो द्वे प्रथमस्याजादेर्द्वितीयस्य

श्री॰
॥१॥

सु ३

अचूचुरत ॥ आटिटत ॥ १० ॥ श्लो ॥ धातोरनभ्यासस्यैकाचो द्वे प्रथमस्याजादेर्द्वितीयस्य ॥ जुहोति ॥ इयर्ति ॥ ११ ॥ दा
श्वान्साह्वान्मीढ्वांश्च ॥ निपात्यन्ते ॥ १२ ॥ ष्यङः सम्प्रसारणम्पुत्रपत्योस्तत्पुरुषे ॥ कारीषगन्ध्यायाः पुत्रः कारीष
गंधीपुत्रः ॥ कारीषगन्धीपतिः ॥ १३ ॥ बन्धुनि बहुव्रीहौ ॥ ष्यङः सम्प्रसारणम् ॥ कारीषगन्धीबन्धुः ॥ १४ ॥ वचि
स्वपियजादीनां किति सम्प्रसारणम् । उक्तम् । यजादीनां खल्वपि ॥ इष्टं । उप्तम् ॥ यजादयो भ्वादिद्युगणान्तात् ॥ १५ ॥ ग्रहि
ज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । चात्किति सम्प्रसारणम् ॥ गृहीतं । जीनं । उतं विद्धमित्या
दि ॥ ङिति खल्वपि गृह्णाति । जिनातीत्यादि ॥ १६ ॥ लिड्यभ्यासस्योभयेषाम् ॥ सोषुप्यते ॥ सेसिम्यते ॥ वेवीयते ॥ १९
नवशः ॥ यङि । सम्प्रसारणं । वावश्यते ॥ २० ॥ चायः की ॥ यङि ॥ चेकीयते ॥ २१ ॥ स्फायः स्फी निष्ठायां ॥ स्फीतं ॥ स्फी
तवान् ॥ २२ ॥ स्त्यः प्रपूर्वस्य ॥ निष्ठायां सम्प्रसारणं ॥ प्रस्तीमं ॥ २३ ॥ द्रवमूर्तिस्पर्शयोः श्यः ॥ निष्ठायां सम्प्रसारणं ॥ मू
र्तिः काठिन्यं ॥ शीनं घृतं ॥ शीतं जलं ॥ २४ ॥ प्रतेश्च ॥ श्यः सम्प्रसारणं निष्ठायां ॥ प्रतिशीतः ॥ २५ ॥ विभाषाभ्यवपूर्वस्य

श्यः सम्प्रसारणं निष्ठायां ॥ अभिश्यानं घृतं ॥ अवश्यानो वृश्चिकः ॥ पक्षे अभिशीतं ॥ अवशीतः ॥ २६ ॥ शृतं पाके ।
श्रातिश्रपयत्योर्निपातनं ॥ क्षीरहविषोः पाके ॥ अन्यत्र श्राणं श्रपितं वा ॥ २७ ॥ प्यायः पी । निष्ठायां ॥ पीतं ॥ पीतवा
पिप्र ना ॥ २८ ॥ लिड्यङोश्च ॥ प्यायः पी ॥ पिप्याते । पिप्यिरे ॥ यङि पेपीयते ॥ विभाषा श्वेः ॥ लिड्यङोः संप्रसारणं ॥ शुशा
व ॥ शुशुवतुः ॥ शुशुवुः । शिश्वाय । शिश्वियतुः । शिश्वियुः । यङि शोशूयते ॥ शेश्वीयते ॥ २९ ॥ णौ च संश्चङोः ॥ वि
भाषा श्वेः संप्रसारणम् ॥ शुशावयिषति ॥ शिश्वाययिषति ॥ चङि अशूशुवत ॥ अशिश्वयत ॥ ३१ ॥ ह्वः संप्रसारणम
भ्यस्तस्य च ॥ णौ संश्चङोः ॥ जुहावयिषति ॥ अजूहवत ॥ अभ्यस्तस्य खल्वपि ॥ जुहाव ॥ जुहुवतुः ॥ जुहुवुः
अभ्यस्तस्येति योगविभागोऽत्र भाष्ये ॥ ३२ ॥ बहुलं छन्दसि ॥ ह्वः सम्प्रसारणम् ॥ इन्द्रमाहुवे ॥ ३३ ॥ चायः की छन्दसि ब
हुलम् ॥ नान्यं चिक्युर्न निचिक्युरन्यम् । लिङ्गुसिस्त्पम । नेह ॥ अग्ने ज्योतिर्निचाय्य ॥ ३५ ॥ अपस्पृधेथामानृ राम·
चुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्तः ॥ छन्दसि निपात्यन्ते ॥ इन्द्रश्च विष्णो अपस्पृधेथां ॥ स्पर्द्धेर्लङ्याथां ॥२॥

अर्कमान्र्चुः ॥ वस्तन्यामन्द्रुः ॥ अर्वेर्रेहेश्वलियुमि ॥ चि ॥ च्युपे ॥ च्युङोलिटिथामि ॥ यक्तियाज ॥ तिजेर्गलि ॥ श्रातास्त
इदृसोमाः ॥ श्रितानोग्रहाः ॥ श्रीजपाकेनिष्ठायां ॥ नाशिरंड हे मध्यन आशार्तः ॥ श्रीज एवक्तिपिनिष्ठायांच ॥ ३६ ॥ नसंप्र
सारणोसंप्रसारणं ॥ अर्थात्सर्वस्ययणः ॥ वश्रश्च· प्रनः ॥ ३७ ॥ लिटि वयोयः ॥ संप्रसारणंन ॥ ऊयतुः ॥ ऊयुः ॥ उवयिथ ॥ ३८
वश्चास्यान्यतरस्यांकिति ॥ लिटि ॥ अस्येतिवयोयस्य ॥ ऊवतुः ॥ ऊवुः ॥ ३९ ॥ वेञः नसंप्रसारणंलिटि ॥ ववोववतुः व
वुः ॥ ४० ॥ ल्यपिच ॥ वेञोनसंप्रसारणं ॥ प्रवाय ॥ ज्यश्च ल्यपिनसंप्रसारणं ॥ अवज्याय ॥ ४२ ॥ व्यश्च ॥ नसंप्रसारणंल्य
पि ॥ प्रव्याय ॥ ४३ ॥ विभाषापरेः ॥ व्योऽल्यपिनसंप्रसारणं ॥ परिव्याय· परिवीय ॥ ४४ ॥ आदेचउपदेशेऽशिति ॥ धातोः
ग्लेम्लेः ॥ जग्ले मम्ले ॥ ४५ ॥ नव्योलिटि ॥ आत ॥ ह्विह्विः ॥ विव्याय ॥ विव्यतुः ॥ विव्युः ॥ ४६ ॥ स्फुरतिस्फुलत्योर्घञि ॥ आत
स्फारः ॥ स्फालः ॥ ४७ ॥ क्रीङ्·जीनांणौ ॥ आत ॥ क्रापयति ॥ अध्यापयति ॥ जापयति ॥ ४८ ॥ सिद्धोतरपारलौकिके ॥ णावात
साधयत्यन्नं ॥ मीनातिमीनोतिदीङांल्यपिच ॥ आतचादशित्येजनिमित्ते ॥ प्रमाय० प्रदाय० ममौ ॥ माता ॥ मास्यतीत्यादि० ॥

3 दाता ॥ दास्यति ॥ ५० ॥ विभाषा लीयतेः ॥ आदशितित्यपि च ॥ श्यनानिर्देशोयन्लयका ॥ लाता ॥ लेता ॥ ल्यपि निलाय ॥
निलीय ॥ ५१ ॥ खिदेश्छंदसि ॥ आत् ॥ चिखाद ॥ लोके तु चिखेद ॥ ५२ ॥ अपगुरो णमुलि ॥ आद्विभाषा ॥ अपगारमपगा
रम् ॥ अपगोरमपगोरम् ॥ चिस्फुरोर्णौ ॥ विभाषा आत् ॥ आदन्तत्वात्पुक् ॥ चापयति ॥ चाययति ॥ स्फारयति स्फोरय
ति ॥ ५४ ॥ प्रजने वीयतेः ॥ णावाद्विभाषा ॥ वापयति ॥ वाययति गाः पुरोवातः ॥ गर्भं ग्राहयतीत्यर्थः ॥ ५५ ॥ बिभेतेर्हेतुभये
णावाद्विभाषा ॥ हेतुभये इति प्रयोजकाद्भयं चेत् ॥ मुंडो भापयते ॥ पक्षे भीषयते ॥ ५६ ॥ नित्यं स्मयतेः ॥ णावाद्धेतोश्चेत्स्म
यः ॥ मुंडो विस्मापयते ॥ ५७ ॥ सृजिदृशोर्झल्यमकिति ॥ स्रष्टा ॥ द्रष्टा ॥ ५८ ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्
अमकिति ॥ क्रप्ता ॥ कर्प्ता ॥ ५९ ॥ शीर्षंश्छंदसि ॥ शिरःशब्देन समानार्थो निपात्यते ॥ अश्वस्य शीर्षाणं प्रयती
मुवाच ॥ ६० ॥ ये च तद्धिते ॥ शिरसः शीर्षन् ॥ शीर्षण्यो मुख्यः ॥ वा केशेषु ॥ शीर्षण्याः ॥ शिरस्याः केशाः ॥ अचि शीर्षः ॥ ह
स्तिशिरसोऽपत्यं हास्तिशीर्षिः ॥ पैलुशीर्षिः ॥ ६१ ॥ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ राम ॥ ३ ॥

षु॥ आदेशैःस्वानुरूपास्थानिन आसिष्यन्ते॥ तेचपाददन्तनासिकामासहृदयनिशाअसृज्यूषदोषयकृतशकृतउ
दक आस्य इत्येते॥ पदः॥ पदा॥ पद्भ्यामित्यादिमांसपृतनासानूनांमांसपृत्स्नवः॥ मांस्यवन्यास्वाम्याइत्यादि॥ ६२॥
धात्वादेःषःसः॥ षिध॰ सेधति॥ ष्वद॰ स्वदयति॥ ६३॥ णोनः॥ धात्वादेः॥ णीञ् नयति॰॥ णह॰ नह्यति॥ ६४॥ लोपोव्योर्वलि
वस्यजीधेरदोकुन्॥ पृथिवीजीरदत्वं॰ यस्य॰ पचेरन्॥ गोधेरः॥ ६५॥ वेरपृक्तस्यलोपः॥ ब्रह्मभ्रूणवृत्रेषुक्विप्॰
ब्रह्महा॥ ६६॥ हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल्॥ लुप्यते॥ हलः॥ राजा॥ अजागर्भवानभिनोत्र॥ ङी॰ देवी॰ गो
री॥ ब्राह्मणी॥ आपः॥ खट्वा॥ सुधर्मा कारीषगंध्या॥ ६७॥ एङ्ह्रस्वात्संबुद्धेः॥ हल्लुप्यते॥ एङः हे अग्ने॥ हे वायो॥ ह्र
स्वात॥ हे राम॥ हे वधु॥ ६८॥ शेश्छन्दसिबहुलं॰ लोपः॥ यापात्राणि पश्येयानिपात्राणि॥ ६९॥ ह्रस्वस्यपितिकृतितु
क्॥ आगमः॥ अग्निचित्॥ प्रकृत्य॥ ७०॥ संहितायां॥ अधिकारसूत्रं॥ ७१॥ छेच॥ ह्रस्वस्यतुक्संहितायां॥ इच्छति॰ गच्छ
ति॥ ७२॥ आङ्माङोश्च॥ छेतुक्संहितायां॥ आच्छास्यति॥ माच्छिदत्॥ ७३॥ दीर्घात्पदान्ताद्वा॥ छेतुक्संहितायां

५ यां॥ कुटीच्छाया॥ कुटी छाया॥ दीर्घादितियोगविभागः॥ म्लेच्छति॥ चेच्छिद्यते॥ ७४॥ इकोयणचि॥ संहितायां
दध्यत्र॥ मध्वत्र॥ चक्रतुः॥ घस्त्रादेशः॥ ७५॥ एचोयवायावः॥ अचि संहितायां॥ नयनं॥ लवनं॥ नायकः॥ लावकः॥
७६॥ वान्तो यि प्रत्यये॥ ओकारौकारयोः॥ बाभ्रव्यः॥ नाव्यो ह्रदः॥ ७७॥ धातोस्तन्निमित्तस्यैव॥ एचो वान्तः तन्नि
मित्तस्यैवेति यादिप्रत्ययनिमित्तस्यैवेव॥ लव्यं॥ अवश्यलाव्यं॥ नेह॥ ओयते॥ ओयत॰ क्षय्यजय्यौ शक्या
र्थे॥ निपात्येते॥ शक्यार्थे किम्॥ क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मनः॥ ७९॥ क्रय्यस्तदर्थे॥ निपात्यते॥ तस्मै प्रक्र
त्यर्थाय इदन्तदर्थम्॥ क्रय्यः कम्बलः॥ क्रयार्थं प्रसारित इत्यर्थः॥ क्रेयमन्यत्॥ क्रयणार्हमुच्यते॥ ८०॥ भय्य
प्रवय्ये च छंदसि॥ विभेत्यस्माद्भय्यः॥ वत्सतरी प्रवय्या॥ ८१॥ एकः पूर्वपरयोः॥ अधिकारसूत्रं॥ ८२॥ अन्ता
दिवच्च॥ योयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवदित्यर्थः॥ ब्रह्मबन्धूः॥ प्रातिपदिकाप्रातिपदिकयोरेका राम॰
देशः प्रातिपदिकस्यान्तवद्भवतीति प्रातिपदिकत्वात् स्वाद्ययः॥ हक्षो॥ सुबसुपोरेकादेशः सुप आदिवद्भवतीति सु ॥ ४ ॥

वनत्वात्सत्संज्ञा ॥ ८३ ॥ षत्वतुकोरसिद्धः ॥ एकादेशः ॥ कोसिचत ॥ एकादेशस्य परं प्रत्यादिवद्भावात्पदादेरिणान
न्तरस्यादेशसकारस्य प्राप्तं षत्वं न भवति ॥ अधीत्य ॥ प्रेत्य ॥ एकादेशस्यासिद्धत्वा ह्रस्वस्येति तुग्भवति ॥ आद्गु
णः ॥ अचि पूर्वपरयोरेकः संहितायाम ॥ उपेन्द्रः ॥ गंगोदकं ॥ ८४ ॥ वृद्धिरेचि ॥ आत्पूर्वपरयोरेकः संहितायां ॥
ब्रह्मैकत्वं ॥ गंगौघः ॥ देवैश्वर्यं ॥ कृष्णौत्कण्ठ्यं ॥ ८६ ॥ एत्येधत्यूठ्सु ॥ वृद्धिरेचि ॥ उपैति ॥ उपैधते ॥ प्रष्ठौहः ॥ अक्षा
द्वहिन्यां ॥ अक्षौहिणी ॥ स्वादीरेरिणोः ॥ स्वैरं ॥ स्वैरी ॥ प्राद्वहोढोढ्येषैष्येषु ॥ प्रौहः ॥ प्रौढः ॥ प्रौढिः ॥ प्रैषः ॥ प्रैष्यः
ऋते च तृतीयासमासे ॥ सुखेन ऋतः प्रवत्सतरकम्बलवसनार्णदशानामृणे ॥ प्रार्णमित्यादि ॥ ८७ ॥ आट
श्च ॥ अचि वृद्धिः ॥ ऐक्षिष्ट ॥ ऐक्षत ॥ कुमार्यैः ॥ ब्रह्मबन्धौ ॥ ८८ ॥ उपसर्गा इति धातौ ॥ आद्वृद्धिः ॥ प्रार्छति ॥
उपार्छति ॥ ८९ ॥ वा सुप्यापिशलेः ॥ ऋति धातौ वा उपसर्गाद्वृद्धिः ॥ आपिशलिग्रहणं पूजार्थं ॥ प्रार्षभीयति
पक्षे गुणः प्रर्षभीयति ॥ ९० ॥ औतोम्शसोः ॥ आ ओत इति छेदः ॥ गंगाः ॥ ९१ ॥ एङि पररूपम ॥ आदुपसर्गाद्

तावेकः पूर्वपरयोस्संहितायाम्॥ प्रेजते॥ उपोषति॥ शकन्ध्वादिषु पररूपं वाच्यं॥ शकन्धुः। कर्कन्धुः। कुलटा॰ सी
मान्तोन्यः॰ हलीषा॰ मनीषा॰ पतञ्जलिः॥ सारङ्गः पशुपक्षिणोः। साराङ्गोन्यः॰ आकृतिगणोयं॰ मार्तण्डः॥ एवे चा
नियोगे॰ क्वेव भोक्ष्यसे॰ नियोगे तु मम मेव जन्मान्तरपातकानां॥ आत्वोष्ठयोः॥ समासे वा॥ स्थूलोतुः॥ बिंबोष्ठः॥ पक्षे
वृद्धिः॥ १२॥ ओमाङोश्च॥ आत्पररूपं॰ शिवायोन्नमः॰ शिवेहि॰॥ १३॥ उस्यपदान्तात्॰ आत्पररूपं॰ निन्द्युः॥ अ
धुः॥ अद्युः॥ १४॥ अतो गुणे॥ अपदान्तात्पररूपं॥ पचन्ति॰ भवन्ति॰ पचे॰ यजे॰ १५ अव्यक्तानुकरणस्यात इतौ॰ पररूपं
पटत् इति पटिति॥ १६॥ नाम्रेडितस्यान्त्यस्य तु वा॰॥ अव्यक्तानुकरणस्य इतौ पररूपं॰ पटत्पटेति॰ पक्षे॰ पटत्पटदिति॰
१७॥ नित्यमाम्रेडिते डाचि॰ अव्यक्तानुकरणस्यात अंत्यस्य पररूपं॰ इति तकार पकारयोः पकारः॰ पटपटाकरो
ति॰ एवं दमदमाकरोति॥ १८॥ अकः सवर्णे दीर्घः॥ एकः पूर्वपरयोरचि संहितायां॰ दंडाग्रं॰ हरीन्द्रः॰ मधूदकं॰ होतृकारः
१९॥ प्रथमयोः पूर्वसवर्णः॥ अको चि दीर्घः॥ प्रथमयोरिति सप्तविभक्तिषु प्रथमयोः प्रथमाद्वितीययोरित्यर्थः॥ अग्नी वा

य्र· वृक्षाः॰ वृक्षान्·॥ १०॥ तस्माच्छसोनः पुंसि· तस्मादिति पूर्वसवर्णदीर्घात्· वृक्षान्। अग्नीन्॥ वायून्॥ पितॄन्
१०१॥ नादिचि॥ पूर्वसवर्णदीर्घः॥ वृक्षौ॥ खट्वे॥ कुंडे॥ १०२॥ दीर्घाज्जसिच॥ चादिचि पूर्वसवर्णदीर्घो न। गौर्यौ॥ गौर्यः
१०३॥ वा छंदसि॥ जसि पूर्वसवर्णदीर्घः मारुतीश्चतस्रः पक्षे मारुत्यः॥ १०४॥ अमि पूर्वः॥ अकोचि पूर्वरूपं॥ वृक्षं
अग्निं·। वायुं· वा छंदसीत्येव· स्तूम्यं· सुषिरामिव·। १०५॥ संप्रसारणाच्च·॥ अचि पूर्वरूपं· इष्टं· सुप्तं· गृहीतं·। १०६॥ एङः पदा
न्तादति॥ पूर्वरूपं॥ अग्नेत्र॥ वायोत्र॥ १०७॥ ङ·सि ङ·सोश्च॥ एङोति पूर्वरूपं॥ अग्नेर्माणवकं वारयति॥ वायोरागच्छति
अग्नेः स्वं वायोः स्वं॥ १०८॥ ऋतउत॥ ङ·सि ङ·सोरति पूर्वपरयोरेकः॥ होतुरागच्छति॥ पितुः स्वं॥ १०९॥ ख्यत्यात्परस्य
ङ·सि ङ·सोरत उत्॥ सख्युः॥ पत्युः॥ ११०॥ अतोरोरप्लुतादप्लुते॥ अतिउत्॥ शिवोर्च्यः॥ आश्रयात्सिद्धत्वं॥ १११॥ हशि
च॥ अप्लुतादतो रोरुत्॥ देवो हसति॥ ११२॥ नांतः पादमव्यपरे॥ एङोति॥ संहितायामित्यारभ्योक्तेन॥ पादेष्वेक्यादः तस्मा
मध्येऽन्त्यं तः पादं॥ उपप्रयंतो अध्वरं॥ अध्वर्यो अद्रिभिः॥ सुजाते अश्वसूनृते॥ अव्यपरे किं। तेऽवदन्। तेऽयजन्॥ प्र

6 कृत्यंतःपादमितिपाठांतरं ॥ ११३ ॥ अव्यादवद्यादवक्रमुरव्रतायमवंत्ववस्युषु च ॥ एङोंतःपादं न ॥ वसुभिर्नो अव्यात्
मित्रमहो अवद्यात् ॥ मा शिवासो अवक्रमुः ॥ ते नो अव्रत ॥ शतधारो अयं मणिः ॥ ते नो अवंतु ॥ कुशिकासो अवस्यव
११४ ॥ यजुष्युरः ॥ एङोन ॥ यजुषि पादनियमाभावादनंतःपादार्थं सूत्रं ॥ उरोऽन्तरिक्षं ॥ ११५ ॥ आपो जुषाणो वर्षिष्ठेऽवे
ऽवालेऽविकेपूर्वे ॥ एङोतिन यजुषि ॥ अंबिकेशब्दास्त्वौ यावं बें बालिके शब्दावित्यर्थः ॥ आपो अस्मान्मातरः ॥
जुषाणो अग्निः ॥ वृष्णो अꣳशुभ्यां ॥ वर्षिष्ठे अधिनाके ॥ अंबे अंबिके ॥ ११६ ॥ अंगइत्यादौ च ॥ अंगशब्दे य एङ् त
दादौ च य एङ् तस्य संहितायामित्युक्तं न यजुषि ॥ ऐंद्रः प्राणो अंगे अंगे निदीध्यत् ॥ ११७ ॥ अनुदात्ते च कुधपरे ॥ अ
ति एङोन यजुषि ॥ अयꣳसो अग्निः ॥ सो अध्वराय ॥ ११८ ॥ अवपथासि च ॥ अनुदात्ते एङोन यजुषि ॥ त्री रुद्रेभ्यो
अवपथाः ॥ ११९ ॥ सर्वत्र विभाषा गोः ॥ एङोति पूर्वरूपं न ॥ गो अग्रं ॥ गोग्रं ॥ सर्वत्रेति लोकवेदयोः ॥ १२० ॥ अवङ् स्फोटा
यनस्य ॥ गोरचि ॥ गवाग्रं ॥ गवोष्ट्रं पक्षे यथाप्राप्तं ॥ १२१ ॥ इंद्रे च ॥ गोरवङ् ॥ गवेंद्रः ॥ १२२ ॥ प्लुतप्रगृह्या अचि नित्यं ॥ संहिताया

राम॰ ॥ ६ ॥

मिलुक्तंन॥ हे देवदत्ता ३ इह॥ अग्नी३इ॥ वायउ३इह॥ पुनरज्ग्रहणं आदेशनिमित्ताच्च परिग्रहार्थं॥ जान्त अस्यरु
जति॥ जान्च स्यरुजति॥ १२३॥ आङ्गोनुनासिकश्छंदसि॥ अचि॥ तस्यच संहितायामिलुक्तंन॥ अभ्रआँ
अपः॥ गभीर ओँ उग्रपुत्रे॥ १२४॥ इकोसवर्णे शाकल्यस्य ह्रस्वश्च॥ अचि॥ चक्रि अत्राचक्र्यत्र॥ सित्सभा
मयोर्न॥ पार्श्वं॥ वाप्यश्वः॥ १२५॥ ऋत्यकः॥ शाकल्यस्य ह्रस्वः॥ खट्वा ऋष्यः॥ खट्वर्श्यः॥ १२६॥ अप्लुतवदु
पस्थिते॥ अर्थात्प्लुतः समुदायादवाछिद्यपदं येनस्वरूपेऽवस्थाप्यते सउपस्थित अनार्षइतिशब्दः
सुश्लोकेति अप्लुतवद्भावाद्यणादिकार्यं॥ सुश्लोका ३ इति॥ १२७॥ ई३ चाक्रवर्मणस्य॥ प्लुतो अचि अप्लुतवत्॥ चिनुही३
इदं॥ चिनुहीदं॥ १२८॥ दिवउत्॥ पदांते॥ द्युकामः॥ द्युमान्॥ द्युभ्यां॥ द्युभिः॥ १२९॥ एतत्तदोः सुलोपोकोरन
ञ्समासेहलि॥ एषविष्णुः॥ सशंभुः॥ अकोः किं॥ एषकोरुद्रः॥ १३०॥ स्यश्छंदसि बहुलं॥ सुलोपोहलि॥ ए
षस्यवाजीक्षिपणिम्॥ १३१॥ सोचिलोपे चेत्पादपूरणं॥ सुलोपोबहुलं॥ सैषधीरनुरुध्यसे॥ सेमामविड्ढि

7

प्रश्नतिम॥ १३२॥ सुट्कात्पूर्वः॥ अधिकारस्त्वं॥ १३३॥ संपरिभ्यां भूषणसमवाययोः करोतौ॥ सुट्कात्पूर्वः संस्कारो
संचस्कार॰ समस्कार्षीत्॥ परिष्कारो विभूषणं॥ समवायः समुदायस्तत्र॥ तत्र नः संस्कृतं॥ परिष्कृतं॥ समुदितमित्य
र्थः॥ अत्र वृत्तौ संपरिभ्यां करोतौ भूषणे॥ समवाये चेति सूत्रद्वयं पठ्यते॥ १३४॥ उपात्प्रतियत्नवैकृतवाक्या
ध्याहारेषु॥ करोतौ सुट्कात्पूर्वः॥ प्रतियत्ने॥ एधोदकस्योपस्कुरुते॥ वैकृते॥ उपस्कृतं भुङ्क्ते॥ वाक्याध्याहारे उप
ल स्कृतं जल्पति॥ १३५॥ किरतौ लवने॥ उपात्सुट्कात्पूर्वः॥ उपस्कारं मद्रकालुनंति॥ विक्षिप्य लुनंतीत्यर्थः॥ १३६
हिंसायां प्रतेश्च॥ किरतौ सुट्कात्पूर्वः॥ चादुपात्॥ प्रतिस्कीर्णं ह वृषल ते भूयात्॥ उपस्कीर्णं॥ तथा ते विक्षेपो भूया
त्॥ यथा हिंसामनुबध्नातीत्यर्थः॥ १३७॥ अपाच्चतुष्पाच्छकुनिष्वालेखने॥ सुट्कात्पूर्वः॥ अपस्किरते वृषो हृष्टः
कुक्कुटो भक्ष्यार्थी॥ श्वा आश्रयार्थी च॥ आलिख्य विक्षिपतीत्यर्थः॥ १३८॥ कुस्तुम्बुरूणि जातिः॥ निपात्यंते कु राम.
स्तुंबुरुरोषधिजातिः॥ १३९॥ अपरस्पराः क्रियासातत्ये॥ निपात्यते॥ अपरस्पराः सार्था गच्छंति॥ संततमविच्छेदेन ॥७॥

गच्छंतीत्यर्थः॥१४०॥गोष्पदंसेविताऽसेवितप्रमाणेषु॥गोभिःसेवितोष्पदोदेशः।गावःपद्यंतेयस्मिन्॥असेविते॥अगो
ष्पदान्यरण्यानि॥प्रमाणे।गोष्पदपूरंवृष्टोदेवः॥गोष्पदमात्रंक्षेत्रं॥१४१॥आस्पदंप्रतिष्ठायां॥निपात्यते॥अत्म
स्था रक्षणाफलकः।नलाभः प्रतिष्ठा॥१४२॥वर्च्चस्केऽवस्करः॥निपात्यते॥ऽर्थंपुरीषंवर्च्चस्कः॥१४३॥अपस्करोरथांगं
निपात्यते॥१४४॥विष्किरःशकुनौवा॥पक्षेविकिरः॥१४५॥आश्चर्यमनित्ये॥निपात्यते॥अनित्यतयाविषय
भूततया अद्भुतमिहलक्ष्यते॥१४६॥ह्रस्वाच्चंद्रोत्तरपदेमंत्रे॥सुट् उमेसुश्चंद्रः॥१४७॥प्रतिष्कशश्चकशेः॥निपा
त्यते॥ग्राममद्यप्रवेक्ष्यामिभवमेत्वंप्रतिष्कशः॥सहायइत्यर्थः॥१४८॥प्रस्कण्वहरिश्चंद्रावृषी॥निपात्येते॥१४९॥
मस्करमस्करिणौवेणुपरिव्राजकयोः॥क्रमान्निपात्येते।नेह।मकरोग्राहः॥मकरीसमुद्रः॥१५०॥कास्तीराजस्तुंदेनगरे
निपात्येते॥१५१॥पारस्करप्रभृतीनिचसंज्ञायां॥निपात्यंते॥पारस्करोदेशः पारस्करोवृक्षः॥रथस्यानदी॥किष्कुःप्र
माणं॥किष्किंधागुहा॥तद्बृहतोःकरपत्योश्चोरदेवतयोःसुट्तलोपश्च॥तस्करः॥बृहस्पतिः॥प्रायश्चित्तः॥प्रायश्चि

त्रिः॥ आकृतिगणोयं॥ अधिश्रयंतीजेनताः॥ १५२॥ अनुदात्तंपदमेकवर्जं॥ परिभाषेयंस्वरविषया॥ एकवर्जमितिय
त्रान्यःस्वरउदात्तःस्वरितोवातमेकंवर्जयित्वाशेषंपदमित्यर्थः॥ सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइति
वाच्यं॥ १५३॥ कर्षात्वतोघञोंतउदात्तः॥ कर्षः॥ आत्वतःखल्वपि॥ पाकः॥ त्यागः॥ रागः॥ जित्स्वरापवादः॥ कर्षेति
विकृतनिर्देशस्तोदादिकस्यकृषतेर्निवृत्त्यर्थः॥ १५४॥ उंछादीनांच॥ अंतउदात्तः॥ उंछः॥ म्लेछः॥ जाजः॥ जल्पः
एतेघञंताः॥ जपः॥ वधः॥ अवंतो॥ युजेर्घञंतस्यकालविशेषेरथाद्यवयवेचगुणाभावोनिपात्यते॥ वैश्वानरःकु
शिकेभिर्युगेयुगे॥ नेह॥ योगेयोगेतवस्तरं॥ गरोदूष्येवंतः॥ वेगवेदवेष्टबंधाः॥ करणेघञंताः॥ स्तुयुद्रुवश्छंदसि प
रिष्टुत॥ सुयुत॥ परिद्रुत॥ वर्त्त॥ निःस्रोत्रे॥ श्वभ्रेदरः॥ सांवता॥ पोभावगर्ह्यायां॥ उत्तमशश्वत्तमौसर्वत्र॥ उत्तुत्तमं
वरुण॥ शश्वत्तममीलते॥ भक्षमोगमंथदेहाघञंताः॥ १५५॥ अनुदात्तस्यचयत्रोदात्तलोपः॥ उदात्तः॥ देवीजोषू॥ राम
१५६॥ धातोः॥ अंतउदात्तः॥ गोपायतेनः॥ असिमत्यः॥ १५७॥ चितः॥ अंतउदात्तः॥ ठक्॥ आग्नेयः॥ कुक्षग्रीवः॥ ॥ च॥

अरण्यायस्वप्रः॥ चितःसप्रकृतेरितिवक्तव्यं॥ नमंतामन्यके॥ प्रकेसरस्वती॥ १५८॥ तद्धितस्यकितः॥ अंतउदात्तः

अत्रभाष्ये ॥ तद्धितस्येति योगविभागाच्चितोपि ॥ कौंजायनाः ॥ परोपि स्वरितश्चरोन ॥ १५९ ॥ तिसृभ्यो जसः ॥ अंतउदात्तः
तिस्रश्चमे ॥ १६० ॥ चतुरः शसि ॥ अंतउदात्तः ॥ चतुरः ॥ कृत्वस्यर्थतः ॥ १६१ ॥ सावेकाचस्तृतीयादिर्विभक्तिः ॥ उदात्ता ॥ सा विति
सप्तमीवद्रुवचनं तत्रयस्य काञ्च ॥ वाचा ॥ वाग्भ्यां ॥ नेह ॥ राज्ञा ॥ राज्ञे ॥ सुप्यनेकाच्त्वात ॥ १६२ ॥ अंतोदात्तादुत्तरपदादन्य
तरस्यामनित्यसमासे ॥ तृतीयादिर्विभक्तिरुदात्ता ॥ परमवाचा परमवाचि ॥ पक्षे समासांतोदात्तत्वं ॥ १६३ ॥ अंचेश्छंदस्यसर्व
नामस्थानं ॥ विभक्तिरुदात्ता ॥ इंद्रो दधीचो अस्थभिः ॥ १६४ ॥ उदिदं पदाद्यप्पुम्रैद्युभ्यः ॥ असर्वनामस्थानं विभक्तिरुदा
त्ता ॥ उद् ॥ प्रष्ठौहः ॥ इदं ॥ एभिर्नृभिर्नृतमः ॥ पद्दन्नस्त्येवमाद्यः षट्पदाद्यः ॥ पुड्भ्रां म्सभिः ॥ दृड्भिर्नजिह्वा ॥ मनश्चिन्मे हृद
आ ॥ अप् ॥ अपांफेनेन ॥ नमुचेः पुम् ॥ अम्भ्रातेव पुंसः ॥ रै ॥ रायो धर्त्ता ॥ दिव् ॥ दिवे दिवे ॥ १६५ ॥ अष्टनो दीर्घात ॥ असर्वनाम
स्थानं विभक्तिरुदात्ता ॥ अष्टाभिर्दशभिः ॥ १६६ ॥ शतुरनुमोनद्यजादी ॥ अंतोदात्तान्नदी असर्वनामस्थानमजादिविभक्तिश्चो
दात्ता ॥ अच्छा रवे प्रथमा जानती ॥ सुन्वते यजमानाय ॥ १६७ ॥ उदात्तयणो हल्पूर्वात ॥ उदात्तस्थाने यो यण् हल्पूर्वं तस्मा

स्यानदी [illegible] अजादिश्चासर्वनामस्थानं विभक्तिरुदात्ता ॥ चोदयित्री सूनृता
नां॰ सवित्राप्रसवित्रा॰ ॥ १६६ च ॥ नोङ्॰धात्वोः ॥ नुदात्तयणः पराजादिरसर्वनामस्थानं विभक्तिरुदात्ता ॥ ब्रह्मबंधा ॥ ब्रह्मबं
धे ॥ धातुयणः खल्वपि ॥ सेस्त्राभिः सुभ्वे ॥ १६७ ॥ ह्रस्वनुड्भ्यां मतुप् ॥ ह्रस्वांतादंतोदात्तान्नुटश्च परो मतुबुदात्तः ॥ यो अ
ग्निमाँ जेदनिमाँ इयर्त्ति नुटः खल्वपि ॥ अक्षरवंतः ॥ १७० ॥ नामन्यतरस्यां ॥ मतुपि यो ह्रस्वो ह्रस्वस्तदंतान्नामुदात्तः ॥ चे
तंती सुमतीनां ॥ १७१ ॥ ङ्याश्छंदसि ॥ नामुदात्तोन्यतरस्यां देवसेनानामभिभंजतीनां ॥ नेह ॥ जयंतीनां मरुतो यंत्वग्रं ॥ १७२ ॥
षड्त्रिचतुर्भ्यो हलादिः ॥ विभक्तिरुदात्ता ॥ षट् ॥ आषड्भिर्हूयमानः ॥ त्रि ॥ त्रिषु विक्रमणेषु ॥ चतुर्णां ॥ १७३ ॥ झल्युपोत्त
मं ॥ षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदंते पदे उपोत्तममुदात्तं ॥ पंचभिरक्तवत ॥ तिसृभिश्च वहसे ॥ याहि चतसृभिर्वसो
१७४ ॥ विभाषा भाषायां ॥ सर्वविषये उदात्तः ॥ १७५ ॥ नगोश्वन्साववर्णराडङ्॰क्रुङ्॰कृद्भ्यः ॥ प्रागुक्तं ॥ गोभिः सन्नद्धः ॥ सावेका
च इति प्राप्तः ॥ शुनश्चिच्छेपं ॥ साववर्णेति सौ प्रथमैकवचने ॥ यदवर्णांतं तस्मात् तेभ्यः स्वराट् ॰ येषामिंद्रः ॥ राट् ॥ इदं नमो वृ

प्रत्ययस्वराजे ॥ अङ्. प्राञ्चौ । प्राञ्चे ॥ कुङ्. कुञ्चौ कुञ्चे कृतानमद इत्युक्तत्वात् ॥ १७६ ॥ दिवो झल् ॥ विभक्तिर्नोदात्ता ॥ द्यु भिर्द्युभिः ॥ १७७ ॥ नृ चान्यतरस्यां ॥ झल्विभक्तिर्नोदात्ता ॥ नृभिर्येमानः ॥ १७८ ॥ तित्स्वरितं ॥ क्व॑नेऽश्वाः ॥ १७९ ॥ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ॥ तासेः कर्त्ता ॥ अनुदात्तेतः ॥ य आस्ते ॥ ङितः ॥ अभिचष्टे ॥ अदुपदेशात् ॥ वर्द्धमानं स्वे दमे ॥ १८० ॥ आदिः सिचोऽन्यतरस्यां ॥ उदात्तः ॥ सिचः सिजन्तस्य ॥ यासिष्टं वर्त्तिरश्विनौ ॥ पक्षे प्रत्ययस्वरेणान्तोदात्तत्वं ॥ १८१ ॥ स्वपादिहिंसामच्यनिटि ॥ लसार्वधातुके आदिरुदात्तोऽन्यतरस्यां ॥ स्वपन्ति श्वसन्ति ॥ हिंसन्ति ॥ पक्षे प्रत्ययस्वरः स्वपादय आगणान्तादादिषु ॥ १८२ ॥ अभ्यस्तानामादिः ॥ अच्यनिटि लसार्वधातुके उदात्तः ॥ पुनरादिग्रहणं नित्यार्थं ये ददति प्रिया वसु दधानाः सोमं ॥ १८३ ॥ अनुदात्ते च ॥ लसार्वधातुकेऽभ्यस्तानामादिरुदात्तः ॥ दधासि दाशुषे कवे ॥ १८४ ॥ सर्वस्य सुपि ॥ आदिरुदात्तः ॥ सर्वे नन्दन्ति यशसा ॥ १८५ ॥ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ लसार्वधातुके अभ्यस्तानामुदात्तः ॥ बिभेति ॥ जिह्रेति ॥ बिभर्त्ति जुहोति ॥ ममत्तु नः परिज्मा ॥ जजनदिन्द्रं ॥ माता यद्वीरं दधनत् ॥ दरिद्रा

हिंसेः ।

10 तिर्जौषिर्त्वं ॥ १८६ ॥ लिति ॥ प्रत्ययात्पूर्वमुदात्तं ॥ नुमः ६ः हिराजावक्रणश्चकार ॥ तं प्रत्नथा ॥ १८७ ॥ आदिर्णमुल्यन्यतरस्यां
अन्य ॥ चोइतिलुप्तनकाराकारों चतिर्गृह्यते ॥ २१६ ॥ समासस्य ॥ अंतउदात्तः ॥ यज्ञश्रियं ॥ २१७ ॥ इतिपाणिनिसूत्राणांमित
वृत्यर्थसंग्रहे ॥ षष्ठस्यपादः आद्योयमध्यायस्यसमर्थितः ॥ बहुव्रीहौप्रकृत्यापूर्वपदं ॥ पूर्वपदग्रहणमत्रपूर्वपदस्वरेउदात्ते
स्वरितेवावर्त्तते ॥ सत्यश्लष्टपती ॥ १ ॥ तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या ॥ पूर्वपदान्येतेप्रकृत्या तुल्य
श्वेतः ॥ सदृशश्वेतः ॥ तृतीया शंकुलाखंडः ॥ किरिकाणः ॥ सप्तमी ॥ अक्षशौंडः ॥ पानशौंडः ॥ उपमानशस्त्रीश्यामा ॥ हंसगद्गदा
अव्ययेनञ्कुनिपातानामितिवक्तव्यं ॥ अयज्ञोवाएषः ॥ कुब्राह्मणः ॥ निष्कौशांबिः ॥ परिगणनान्नेह ॥ पीताकालकः स्नाता
कालकः ॥ द्वितीयामुहूर्त्तसुखं ॥ कृत्याः ॥ भोज्योष्णं ॥ पानीयशीतः ॥ २ ॥ वर्णोवर्णेष्वनेते ॥ वर्णवाचिन्युत्तरपदेएतवर्जितेवर्ण
वाचिपूर्वपदंप्रकृत्यातत्पुरुषे ॥ कृष्णसारंगः ॥ ३ ॥ गाधलवणयोःप्रमाणे ॥ उत्तरपदयोस्तत्पुरुषेपूर्वपदंप्रकृत्या ॥ अरित्रग राम·
धमुदकं ॥ तत्प्रमाणमित्यर्थः ॥ गोलवणं यावद्गवे दीयते तत्प्रमाणमित्यर्थः ॥ ४ ॥ दायाद्यं दायादे ॥ तत्पुरुषेप्रकृत्या ॥ धनदा ॥ १९ ॥

तिजागर्भित्वं ॥ १८६ ॥ लिति ॥ प्रत्ययात्पूर्वमुदात्तं ॥ उरुं हि राजा वरुणश्चकार ॥ तं प्रत्नथा ॥ १८७ ॥ आदिर्णमुल्यन्यतरस्यां
चैरंतितु धनकारकारौं च तिर्ईहते ॥ २१६ ॥ ममामस्य ॥ ओंतुदात्तः मह श्रियं ॥ २० ॥ त्वानामुदात्तः ॥ लोलूयं ॥ लो
लूयं ॥ पक्षे लिति स्वरेण मध्योदात्तः ॥ १८८ ॥ अचः कर्तृयकि ॥ उपदेशे अजंतस्य धातोरादिरुदात्तोन्यतरस्यां ॥ लूयते केदारः स्वयमेव
पक्षे यक्स्वरेण मध्योदात्तत्वं ॥ १८९ ॥ थलि च सेटी इंतो वा ॥ आदिर्वा उदात्तोन्यतरस्यां ॥ लुलविथ ॥ अत्रेट्थलकारश्च अभ्यासो कारश्च पर्या
येणोदात्ताः ॥ यदातु नैते त्रयमुदात्तास्तदा लिति प्रत्ययात्पूर्वमुदात्तं ॥ १९० ॥ ञ्नित्यादिर्नित्यं ॥ उदात्तः ॥ ष्यञ् ॥ बृहस्पतेर्हुमामात्येन अनुभ्रा यत्र
तासगर्भ्यः ॥ १९१ ॥ आमंत्रितस्य च ॥ आदिरुदात्तः ॥ अग्न इंद्र वरुण मित्र देवाः ॥ १९२ ॥ पथिमथोः सर्वनामस्थाने ॥ आदिरुदात्तः ॥ अयं
पंथाः ॥ मंथाः ॥ मंथानौ ॥ १९३ ॥ अंतश्च तवै युगपत् ॥ चादिरुदात्तः ॥ हर्षसे दातवा उ ॥ १९४ ॥ क्षयो निवासे ॥ आदिरुदात्तः ॥ स्वे क्षये ॥ १९५ ॥ जयः क
रणं ॥ आदिरुदात्तः ॥ जयत्यनेनेति जयोश्वः ॥ १९६ ॥ वृषादीनां च ॥ आदिरुदात्तः ॥ वृषः ॥ जनः ॥ ज्वरः ॥ ग्रहः ॥ हयः ॥ गयः ॥ नयः ॥ तयः ॥ अयः ॥
अंशः ॥ स्वदः ॥ वेदः ॥ गुहा ॥ शमरणौ संज्ञायां ॥ संमतौ भावकर्मणोः ॥ मंत्रः ॥ शांतिः ॥ कामः ॥ यामः ॥ आरा ॥ धारा ॥ कारा ॥ वहः ॥ कल्पः ॥ पादः ॥ आकृतिगणो
यं ॥ वाजेभिर्वाजिनीवती ॥ १९७ ॥ निष्कच्छ्वाजनात् ॥ सं ज्ञायामुपमानं ॥ आदिरुदात्तः ॥ चंचेव चंचा ॥ वध्रिका अत एव ज्ञापकात्क्वचित्स्वरविधौ प्र
प्रत्ययलक्षणं नेति ॥ १९८ ॥ निष्ठा च द्व्यजनात् ॥ आदिरुदात्तः संज्ञायां ॥ दत्तः ॥ बुद्धः ॥ असंज्ञायां तु कृतं नश्व घ्नी ॥ अनात्किं ॥ त्रातः ॥ आ

10

सः ॥ १९९ ॥ शुष्कधृष्टौ ॥ आद्युदात्तौ ॥ असंज्ञार्थ आरंभः ॥ २०० ॥ आशितः कर्ता ॥ आदिरुदात्तः ॥ कृषन्निस्काल आशितं ॥ २०१ ॥ रिक्ते विभाषा
आदिरुदात्तः ॥ रिक्तः ॥ संज्ञायां तु निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधात् ॥ २०२ ॥ जुष्टार्पिते च छंदसि ॥ आदिरुदात्तौ विभाषा ॥ जु
ष्टः ॥ अर्पितः ॥ भाषायां तु प्रत्ययस्वरेणांतोदात्तौ ॥ २०३ ॥ नित्यं मंत्रे जुष्टार्पिते आदिरुदात्तः ॥ जुष्टं देवेभ्य इदमस्तु ॥ पल्लर आहुरर्पिते ॥ २०४ ॥
युष्मदस्मदोर्ङसि ॥ आदिरुदात्तः ॥ प्रपंतव ॥ नहिते पामम ॥ २०५ ॥ ङयि च ॥ युष्मदस्मदोरादिरुदात्तः ॥ तुभ्यं ॥ ता अंगिरः ॥ आग्नमे त्वामह्यं ॥
॥ २०६ ॥ यतोऽनावः ॥ द्व्यच आदिरुदात्तः ॥ युंजंत्यस्य काम्या ॥ २०७ ॥ ईडवंदवृशंसदुहां ण्यतः ॥ आदिरुदात्तः ॥ ईड्यश्चासि वंद्यश्च वाजि
न् ॥ श्रेष्ठं नो धेहि वार्यं ॥ उक्थ्यामिंद्राय शंस्यं ॥ दोह्या धेनुः ॥ २०८ ॥ विभाषा वेण्विधानयोः ॥ आदिरुदात्तः ॥ वेणुः ॥ इंधानास्त्वा
२०९ ॥ त्यागरागहासकुहश्वठक्रथानां ॥ आदिरुदात्तौ विभाषा ॥ आद्यास्त्रयो घञंताः ॥ त्रयः पचाद्यजंताः ॥ २१० ॥ उपोत्तम
रिति ॥ उदात्तं ॥ रितीति रित्प्रत्ययांतस्य ॥ आहवनीयः ॥ २११ ॥ चङ्यन्यतरस्यां ॥ चङंते उपोत्तममुदात्तं ॥ माहि चीकरतां
२१२ ॥ मतोः पूर्वमात्संज्ञायां स्त्रियां ॥ उदात्तः ॥ शरावती ॥ उदुंबरावती ॥ २१३ ॥ अंतोऽवत्याः ॥ उदात्तः संज्ञायां स्त्रियां ॥ वेत्रवती
अजिरवती ॥ ङीपः पित्वादनुदात्तत्वं प्राप्तं ॥ २१४ ॥ ईवत्याः ॥ अंत उदात्तः संज्ञायां स्त्रियां ॥ अहीवती मुनीवती ॥ २१५ ॥ चौ ॥ पूर्वस्यांत उदात्तः ॥ देवद्रीचीं नयतो देव यंतः ॥ १० ॥ राम.

याद्ः॥ ५॥ प्रतिबंधिचिरकृच्छ्रयोः॥ पूर्वपदं प्रकृत्या तत्पुरुषे॥ गमनचिरं॥ गमनकृच्छ्रं॥ गमनं हि कारणविकलतया चिरका
लता विकृच्छ्रयोगिवा प्रतिबंधि जायते॥ ६॥ पदे ऽपदेशे॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ मूत्रपदेन प्रस्थितः॥ ७॥ निवाते वातत्रा
णे॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ कुटीनिवातं॥ कुड्यनिवातं॥ ८॥ शारदे ऽनार्तवे॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ रज्जुशार
दमुदकं॥ शारदशब्दोयं प्रत्यग्रवाची॥ ९॥ अध्वर्युकषाययोर्जातौ॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ प्राच्याध्वर्युः सर्पि
र्मंडकषायं॥ १०॥ सदृशप्रतिरूपयोः सादृश्ये॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ पितृसदृशः॥ मातृप्रतिरूपः॥ ११॥ द्विगौ प्रमा
णे॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ प्राच्यसप्तसमः॥ सप्तसमाः प्रमाणमस्य॥ प्रमाणे लो द्विगोरिति मात्रचो लुक्॥ १२॥ गंतव्यप
ण्यं वाणिजे॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ मद्रवाणिजः॥ पण्यं॥ गोवाणिजः॥ १३॥ मात्रोपज्ञोपक्रमच्छाये नपुंसके॥ तत्पुरुषे पू
र्वपदं प्रकृत्या॥ भिक्षामात्रं॥ पाणिन्युपज्ञं॥ नंदोपक्रमं॥ इषुच्छायं॥ १४॥ सुखप्रिययोर्हिते॥ तत्पुरुषे पूर्वपदं प्रकृत्या॥ गमन
सुखं॥ व्याहरणप्रियं॥ १५॥ प्रीतौ च॥ गम्यमानायां सुखप्रिययोस्तत्पुरुषे पूर्वपदं प्रकृत्या॥ ब्राह्मणसुखं॥ पायसं॥ छात्र

प्रियोऽनध्यायः ॥ १६ ॥ स्वं स्वामिनि ॥ तत्पुरुषे पूर्वपदं प्रकृत्या ॥ गोस्वामी ॥ अश्वस्वामी ॥ १७ ॥ पत्यावैश्वर्ये ॥ तत्पुरुषे पूर्व
पदं प्रकृत्या ॥ अयमग्निर्गृहपतिः ॥ १८ ॥ न भूवाक्चिद्दिधिषु ॥ पत्यौ ॥ तत्पुरुषे पूर्वोक्तं ॥ भूपतिः ॥ वाक्पतिः ॥ चित्पतिः
दिधिषूपतिः ॥ स्रुष्ठु समासस्यादंतोदात्तत्वं ॥ १९ ॥ वा भुवनं ॥ पत्यौ तत्पुरुषे पूर्वोक्तं ॥ भुवनपतये ॥ पक्षे समासांतोदात्तः
॥ २० ॥ आशंकावाधनेदीयस्सु संभावने ॥ तत्पुरुषे पूर्वपदं प्रकृत्या ॥ गमनाशंकमस्ति ॥ गमनावाधं ॥ गमननेदीयः ॥ ग
मनमाशंक्यते आवाध्यते निकटतरामितिवा संभाव्यते ॥ २१ ॥ पूर्वे भूतपूर्वे ॥ तत्पुरुषे पूर्वपदं प्रकृत्या ॥ आढ्यो भूतपू
र्वः ॥ आढ्यपूर्वः ॥ दर्शनीयपूर्वः ॥ २२ ॥ सविधनीडसमर्यादसवेशसदेशेषु सामीप्ये ॥ तत्पुरुषे पूर्वपदं प्रकृत्या ॥ [illegible] मद्र
सविधं गांधारिसनीडं काश्मीरसमर्यादं मद्रसवेशं म[illegible]द्रसदेशः ॥ २३ ॥ विस्पष्टादीनि गुणवचनेषु ॥ तत्पुरुषे पूर्वप[illegible]
[illegible] प्रकृत्या ॥ विस्पष्टकटुकं ॥ विचित्रकटुकं ॥ विस्पष्ट ॥ विचित्र ॥ विचित्त व्यक्त
संपन्न ॥ पटु ॥ पंडित ॥ कुशल ॥ चपल ॥ निपुण ॥ २४ ॥ श्रज्याऽवमकन्यापवत्सु भावे कर्मधारये ॥ उत्तरपदपूर्वपदं प्रकृत्या

राम॰
॥ १९ ॥

गमनश्रेष्ठं ॥ गमनज्येष्ठं ॥ गमनमध्यमं ॥ गमनकनिष्ठं ॥ गमनपापिष्ठं ॥ भावे किं ॥ गम्यते नेनेति करणाल्युडंते मा भूत् ॥ २५ ॥
कुमारश्च ॥ कर्मधारये पूर्वपदं प्रकृत्या ॥ कुमारश्रमणा ॥ २६ ॥ आदिः प्रत्येनसि ॥ कुमारस्य पूर्वपदस्याद्युदात्तः कर्मधारये
प्रतिगतमेनोस्य प्रत्येनाः ॥ कुमारप्रत्येनाः ॥ २७ ॥ पूगेष्वन्यतरस्यां ॥ उक्तं ॥ कुमारचातकाः ॥ कुमारजीमूताः ॥ आद्यु
दात्तत्वाभावे कुमारश्चेत्येव भवति ॥ २८ ॥ इगंतकालकपालभगालशरावेषु द्विगौ ॥ पूर्वपदं प्रकृत्या ॥ पंचारत्न्यः प्रमा
णमस्य ॥ पंचारत्निः ॥ काल ॥ पञ्चनुदशमास्यः ॥ पंचकपालः ॥ पंचभगालः ॥ पंचशरावः ॥ २९ ॥ बह्वन्यतरस्यां ॥ इगंतकाल
कपालभगालशरावेषु द्विगौ पूर्वपदं प्रकृत्या ॥ बह्वरत्निः ॥ बहुमास्य इत्यादि ॥ ३० ॥ दिष्टिवितस्त्योश्च ॥ पूर्वपदमन्यतर
स्यां प्रकृत्या द्विगौ ॥ पंचदिष्टिः ॥ पंचवितस्तिः ॥ ३१ ॥ सप्तमीसिद्धशुष्कपक्वबंधेष्वकालात् ॥ पूर्वपदं प्रकृत्या ॥ सांकाश्यसिद्धः
निधनशुष्कः ॥ भ्राष्ट्रपक्वः ॥ चक्रबंधः ॥ अकालात् किं ॥ पूर्वाह्णसिद्धः ॥ ३२ ॥ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ एते प्र
कृत्या ॥ परित्रिगर्तं वृष्टो देवः ॥ प्रतिपूर्वाह्णं ॥ प्रत्यपररात्रे ॥ उपपूर्वाह्णं ॥ उपापररात्रं ॥ अपपूर्वाह्णं ॥ अपत्रिगर्तं ॥ इहापप

योरेवव‌र्ज्यमानोत्तरपदं ॥ ३३ ॥ राजन्यवहुवचनद्वंद्वे धकवृष्णिषु ॥ राजन्यवाचिनां वहुवचनांतानां यो द्वंद्वो धकवृष्णिषु वर्त्तते त
त्र पूर्वपदं प्रकृत्या ॥ श्वाफल्कचैत्रकाः ॥ शिनिवासुदेवाः ॥ ३४ ॥ संख्या ॥ पूर्वपदं प्रकृत्या द्वंद्वे ॥ द्वादश त्रयोदश ॥ ३५ ॥ आचार्योपस
र्जनश्चांतेवासी ॥ आचार्योपसर्जनांतेवासिनां द्वंद्वे पूर्वपदं प्रकृत्या ॥ पाणिनीयरौढीयाः ॥ रौढीयकाशकृत्स्नाः ॥ ३६ ॥ कार्त्तकौ
जपादयश्च ॥ एषु पूर्वपदं प्रकृत्या ॥ कार्त्तकौजपौ ॥ सावर्णिमांडूकेयौ ॥ [illegible] ॥ अवंत्यश्मकाः ॥ पैलश्यापर्णेयाः ॥ कपिश्या
पर्णेयाः ॥ शैतिकाक्षपांचालेयाः ॥ कटुकवार्धलेयाः ॥ शाकलशुनकाः ॥ शणकबाभ्रवाः ॥ आर्चाभिमौद्गलाः ॥ कुंतिसुराष्ट्राः
तंडवतंडाः ॥ अविमतकामविद्धाः ॥ बाभ्रवशालंकायनाः ॥ बाभ्रवदानच्युताः ॥ कठकालापाः ॥ कठकौथुमाः ॥ कौथुमलौ
काक्षाः ॥ स्त्रीकुमारौ ॥ मौदपैप्पलादाः ॥ वत्सजरंतः ॥ सौश्रुतपार्थवाः ॥ जरामृत्यू ॥ याज्यानुवाक्ये ॥ ३७ ॥ महान्व्रीह्य
पराह्णगृष्टीष्वासजावालभारभारतहैलिहिलरौरवप्रवृद्धेषु ॥ प्रकृत्या पूर्वपदं ॥ महाव्रीहिः ॥ महापराह्णः ॥ महागृष्टिः
महेष्वासः ॥ महाजावालः ॥ महाभारः ॥ महाभारतः ॥ महाहैलिहिलः ॥ महारौरवः ॥ महाप्रवृद्धः ॥ ३८ ॥ क्षुल्लकश्च वैश्वदेवे राम ॥ १२ ॥

चान्महान् पूर्वपदं प्रकृत्या ॥ क्षुल्लकवैश्वदेवं ॥ महावैश्वदेवं ॥ ३९ ॥ उष्ट्रः सादिवाम्योः ॥ पूर्वपदं प्रकृत्या ॥ उष्ट्रसादी ॥ उष्ट्रवा
मी ॥ ४० ॥ गौः सादसादिसारथिषु ॥ पूर्वपदं प्रकृत्या ॥ गोसादः ॥ गोसादिः ॥ गोसारथिः ॥ ४१ ॥ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्ली
लदृढरूपापारेवडवातैतिलकद्रूःपण्यकंबलो दासीभाराणां च ॥ एषां समासानां पूर्वपदं प्रकृत्या ॥ कुरूणां गार्हपतं कु
रुगार्हपतं ॥ वृजेश्च ॥ वृजिगार्हपतं ॥ रिक्तगुरुः ॥ असूतजरती ॥ अश्लीलदृढरूपा ॥ एते कर्मधारयाः ॥ पारेवडवेव पारे
वडवा ॥ तैतिलकद्रूः ॥ षष्ठीतत्पुरुषः ॥ पण्यकंबलः ॥ कर्मधारयः ॥ दास्या भारो दासीभारः ॥ देवहूतिः ॥ ओषधयः सम
वदंति ॥ पुरंधिः स्योनैसीद ॥ यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न च प्राप्नोति सर्वो दासीभारादिषु द्रष्टव्यः ॥ ४२ ॥
चतुर्थी तदर्थे ॥ पूर्वपदं प्रकृत्या ॥ यूपदारु ॥ ४३ ॥ अर्थे ॥ पूर्वपदं चतुर्थी प्रकृत्या ॥ देवतार्थम् ॥ ४४ ॥ क्ते च ॥ पूर्वपदं चतु
र्थी प्रकृत्या ॥ गोहितं ॥ ४५ ॥ कर्मधारयेऽनिष्ठा ॥ क्ते पूर्वपदं प्रकृत्या ॥ श्रेणिकृताः ॥ ४६ ॥ अहीने द्वितीया ॥ क्ते पूर्वपदं प्रक
त्या ॥ कष्टश्रितः ॥ अहीने किं ॥ कांतारातीतः ॥ ४७ ॥ तृतीया कर्मणि ॥ क्ते पूर्वपदं प्रकृत्या ॥ अहिहतः ॥ नखनिर्भिन्नः ॥ ४८ ॥

13 गतिरनंतरः ॥ कर्मणि क्ते पूर्वपदं प्रकृत्या ॥ पुरोहितं ॥ ४९ ॥ तादौ च निति कृत्यतौ ॥ अंतरो गतिः प्रकृत्या ॥ संगतिं गोः ॥ अतौ किं
आगंतुः ॥ ५० ॥ तवै चांतश्च युगपत् ॥ उदात्तश्चादनंतरो गतिः प्रकृत्या ॥ अन्वेतवा उ ॥ ५१ ॥ अनिगंतोंचतावप्रत्यये ॥ गतिः
प्रकृत्या ॥ ये परांचस्तान् ॥ ५२ ॥ न्यधी च ॥ गती प्रकृत्यांचतावप्रत्यये ॥ न्यङ्ङुत्तानां ॥ अध्यङ् ॥ ५३ ॥ ईषदन्यतर
स्यां ॥ पूर्वपदं प्रकृत्या ॥ ईषत्कडारः ॥ ५४ ॥ हिरण्यपरिमाणं धने ॥ पूर्वपदमन्यतरस्यां प्रकृत्या ॥ द्वे सुवर्णे परिमाण
मस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनं ॥ परत्वाद्बहुव्रीहावपि ॥ ५५ ॥ प्रथमोचिरोपसंपत्तौ ॥ अन्यतरस्यां प्रकृत्या
अभिनवत्वे ॥ प्रथमवैयाकरणः संप्रत्यध्येतुं प्रवृत्त इत्यर्थः ॥ ५६ ॥ कतरकतमौ कर्मधारये ॥ अन्यतरस्यां प्रकृत्या
कतरकठः ॥ कतमकलापः ॥ ५७ ॥ आर्यो ब्राह्मणकुमारयोः ॥ अन्यतरस्यां प्रकृत्या कर्मधारये ॥ आर्यब्राह्मणः
आर्यकुमारः ॥ ५८ ॥ राजा च ॥ अन्यतरस्यां प्रकृत्या ब्राह्मणकुमारयोः कर्मधारये ॥ राजब्राह्मण ॥ राजकुमारः राम.
५९ ॥ षष्ठीप्रत्येनसि ॥ षष्ठ्यंतो राजा न्यतरस्यां प्रकृत्या राजप्रत्येनाः ॥ ६० ॥ क्ते नित्यार्थे ॥ समासे पूर्वपदमन्यतरस्यां ॥ १३ ॥

प्रकृत्या ॥ सुतत प्रहसितः ॥ ६१ ॥ ग्रामः शिल्पिनि ॥ अन्यतरस्यां प्रकृत्या ॥ ग्रामनापितः ॥ ६२ ॥ राजा च प्रशंसायां ॥ शिल्पिन्यन्यतर
स्यां प्रकृत्या ॥ राजकुलालः ॥ राजनापितः ॥ ६३ ॥ आदिरुदात्तः ॥ अधिकारस्सूत्रं ॥ ६४ ॥ सप्तमीहारिणौ धर्म्येऽहरणे ॥ आद्युदात्तौ
देयं यः स्वीकरोति स हारीत्युच्यते ॥ धर्म्यमित्याचारनियतं देयं ॥ मुकुटेकार्षापणः ॥ हलेद्विपदिका ॥ हारिणि याज्ञिकाश्वः
वैय्याकरणहस्ती ॥ ६५ ॥ युक्ते च ॥ समासे आदिरुदात्तः ॥ गोवल्लवः ॥ कर्त्तव्ये तत्परो युक्तः ॥ ६६ ॥ विभाषाध्यक्षे ॥ उत्तरपदे आदि
रुदात्तः ॥ गवाध्यक्षः ॥ ६७ ॥ पापं च शिल्पिनि ॥ विभाषा आदिरुदात्तः पापनापितः ॥ ६८ ॥ गोत्रांतेवासिमाणवब्राह्मणेषु क्षेपे ॥ पू
र्वपदमाद्युदात्तं ॥ भार्यासौश्रुतः ॥ भार्याप्रधानतया सुश्रुतस्यैव क्षेपः ॥ अंतेवासि ॥ ओदनपाणिनीयाः ॥ कुमारीदाक्षाः ॥ ओ
दनादिलाभकामाय ये पाणिन्यादिप्रोक्तानि शास्त्राण्यधीयते ॥ भिक्षामाणवाः ॥ भयब्राह्मणाः ॥ ६९ ॥ अंगानि मैरेये ॥ आद्युदा
त्तानि ॥ अंगानानि मैरेये यांगान्येव ॥ मधुमैरेयं ॥ गुडमैरेयं ॥ ७० ॥ भक्ताख्यास्तदर्थेषु ॥ आद्युदात्ताः ॥ भिक्षाकंसः ॥ भाजीकंसः
भिक्षादयोन्नविशेषाः ॥ ७१ ॥ गोबिडालसिंहसैंधवेषूपमाने ॥ आदिरुदात्तः ॥ धान्यगवः ॥ गोबिडालः ॥ तृणसिंहः ॥ सक्तुसैंधवः

14

धान्यंगोरिवेत्यादिविग्रहः ॥ ७२ ॥ अके जीविकार्थे ॥ आदिरुदात्तः ॥ दंतलेखकः ॥ ७३ ॥ प्राचांक्रीडायां ॥ प्राग्देशवाचिनां या क्रीडा
तद्वाचिनि समासे अके आदिरुदात्तः ॥ उद्दालकपुष्पभंजिका ॥ ७४ ॥ अणि नियुक्ते ॥ पूर्वपदमाद्युदात्तं ॥ नियुक्तोधिकृतः ॥
छत्रधारः ॥ कमंडलुग्राहः ॥ ७५ ॥ शिल्पिनि चाकृञः ॥ अणि पूर्वपदमाद्युदात्तं ॥ तंतुवायः ॥ ७६ ॥ संज्ञायां ॥ अणि पूर्वपदमा
द्युदात्तं ॥ तंतुवायो नाम कृमिः ॥ ७७ ॥ गोतंतियवं पाले ॥ आद्युदात्तं ॥ गोपालः ॥ तंतिपालः ॥ यवपालः ॥ ७८ ॥ णिनि ॥ पूर्वपदमा
द्युदात्तं ॥ पुष्पहारी ॥ ७९ ॥ उपमानं शब्दार्थप्रकृतावेव ॥ णिन्याद्युदात्तं ॥ उष्ट्रक्रोशी ॥ ध्वांक्षरावी ॥ ८० ॥ युक्तारोह्यादयश्च
आद्युदात्ताः ॥ युक्तारोही ॥ आगतरोही ॥ आगतव्याधी ॥ आगतवंधी ॥ आगतनंदी ॥ आगतप्रहारी ॥ आगतमत्स्यः ॥ क्षीरहो
ता ॥ भगिनीभर्त्ता ॥ ग्रामगोधुक् ॥ अश्वत्रिरात्रः ॥ गर्गत्रिरात्रः ॥ व्युष्टित्रिरात्रः ॥ गणपादः ॥ एकशितिपात् ॥ पात्रेसंमितादयश्च ॥ ८१ ॥
दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ आद्युदात्तं ॥ दीर्घकुटीजः ॥ शमीजः ॥ काशजः ॥ तुषजः ॥ भ्राष्ट्रजः ॥ वटजः ॥ ८२ ॥ अंत्यात्पूर्वं बह्व
चः ॥ उदात्तं जे ॥ उपसरजः ॥ मंदुरजः ॥ ८३ ॥ ग्रामे निवसंतः ॥ आद्युदात्ताः ॥ महद्ग्रामः ॥ देवग्रामः ॥ ८४ ॥ घोषादिषु च ॥ पूर्वपदमाद्यु

दात्तं॥ दाक्षिघोषः॥ दाक्षिकटः॥ घोषं॥ कट॥ पल्वल॥ ह्रद॥ वदरी॥ पिंगल॥ माला रक्षा॥ शाल्मली॥ अश्वत्था॥ तृण॥ मुनि
प्रेक्षा॥ कूट॥ ८४॥ घाव्यादयः शालायां॥ आद्युदात्ताः॥ घात्रिशाला॥ व्याडिशाला॥ घात्रि॥ व्याडि॥ सेलि॥ मांडि॥ आरवंडि
आपिशलि॥ आद्यारि॥ गोमि॥ ८६॥ प्रस्थेऽवृद्धमकर्क्यादीनां॥ आदिरुदात्तः॥ इंद्रप्रस्थः॥ सुवर्णप्रस्थः॥ अकर्क्यादी
नांकिं॥ कर्कीप्रस्थः॥ कर्की॥ मघ्नी॥ मकरी॥ कर्कंधु॥ शमी॥ करीर॥ कटुक॥ कुवल॥ वदरी॥ ८७॥ मालादीनांच॥ आदिरुदात्तः
प्रस्थे॥ मालाप्रस्थः॥ शोणप्रस्थः॥ माल॥ शोण॥ [illegible] शाला॥ द्रोणी॥ द्राक्षा॥ ध्राक्षा॥ त्वाक्षा॥ कांची॥ क्षामा॥ एक का
म॥ ८८॥ अमहन्नवं नगरे नुदी[illegible]चां [illegible] दात्तः प्रस्थे माला प्रस्थः शोणप्रस्थः माल शोण
र्वपरमाद्युदात्तं॥ ब्रह्मनगरं॥ उदीचांतु॥ कार्त्तिनगरं॥ महन्नवयोस्तु॥ महानगरं॥ नवनगरं॥ ८९॥ अर्मे चावर्णं द्व्यच् त्र्यच्
आद्युदात्तं॥ गुप्तार्मं॥ कुक्कुटार्मं॥ अमहन्नवमित्येव॥ महार्मं नवार्मं॥ ९०॥ नभ्रताधिकसंजीवमद्राश्मकज्जलं॥ अर्मे
आद्युदात्तं॥ भ्रतार्मं॥ अधिकार्मं॥ संजीवार्मं॥ मद्राश्मग्रहणं संघातविगृहीतार्थं॥ मद्राश्मार्मं॥ मद्रार्मं॥ अश्मार्मं॥ कज्जला

मे ॥ आद्युदात्तप्रकरणो दिवोदासादीनां छंदस्युपसंख्यानं ॥ दिवोदासाय दाशुषे ॥ वध्यश्वाय ॥ आकृतिगणोयं ॥ ९१ ॥ अंतः
15 अधिकारस्सूत्रं ॥ ९२ सर्वगुणकार्त्स्न्ये ॥ पूर्वपदमंतोदात्तं ॥ सर्वश्वेतः ॥ सर्वमहान् ॥ ९३ संज्ञायां गिरिनिकाययोः ॥ पूर्व
पदमंतोदात्तं ॥ अंजनागिरिः ॥ मौंडिनिकायः ॥ ९४ ॥ कुमार्यां वयसि ॥ पूर्वपदमंतोदात्तं ॥ वृद्धकुमारी ॥ ९५ ॥ उदकेकेव
ले ॥ पूर्वपदमंतोदात्तं ॥ अकेवलं मिश्रं तद्धाचि निसमासे ॥ गुडोदकं ॥ ९६ ॥ द्विगौ क्रतौ ॥ पूर्वपदमंतोदात्तं ॥ गर्गत्रिरात्रः
क्रतुः ॥ ९७ ॥ सभायां नपुंसके ॥ पूर्वपदमंतोदात्तं ॥ गोपालसभं ॥ स्त्रीसभं ॥ ९८ ॥ पुरे प्राचां ॥ पूर्वपदमंतोदात्तं ॥ ललाटपुरं
शशदत्तपुरं ॥ प्राचामिति पुरविशेषणं ॥ उदीचां ॥ कार्त्तपुरं ॥ ९९ ॥ अरिष्टगौडपूर्वे च ॥ पुरे पूर्वपदमंतोदात्तं ॥ अरिष्टपुरं
गौडपुरं ॥ १०० ॥ न हास्तिनफलकमार्देयाः ॥ अंतोदात्ताः पुरे ॥ हास्तिनपुरं ॥ फलकपुरं ॥ मार्देयपुरं ॥ १०१ ॥ कुसूलकूप
कुंभशालं बिले ॥ अंतोदात्तं ॥ कुसूलबिलं ॥ कूपबिलं ॥ कुंभबिलं ॥ शालाबिलं ॥ १०२ ॥ दिक्शब्दा ग्रामजनपदाख्यानचा
नराटेषु ॥ अंतोदात्ताः ग्रामे ॥ पूर्वेषुकामशमी ॥ जनपदे ॥ पूर्वपंचालः ॥ आख्याने ॥ पूर्वयायातं ॥ पूर्वचानराटं ॥ १०३ ॥ राम: ॥ १५

आचार्योपसर्जनश्चांतेवासिनि॥ दिक्शब्दा अंतोदात्ताः॥ सर्वपाणिनीयाः॥ १०४॥ उत्तरपदवृद्धौ सर्वं च॥ अंतोदात्तः चाहि
कशब्दः॥ उत्तरपदग्रहणसामर्थ्यादुत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे इति लभ्यते॥ सर्वपांचा
लकः॥ अपरपांचालकः॥ १०५॥ बहुव्रीहौ विश्वं संज्ञायां॥ सर्वपदमंतोदात्तं॥ विश्वकर्मा॥ विश्वदेवः॥ १०६॥ उदराश्वे
षुषु॥ सर्वपदमंतोदात्तं बहुव्रीहौ संज्ञायां॥ वृकोदरः॥ हर्यश्वः॥ महेषुः॥ १०७॥ क्षेपे उदराश्वेषुषु सर्वपदमंतोदात्तं
बहुव्रीहौ॥ घटोदरः॥ कटुकाश्वः॥ चलाचलेषुः॥ १०८॥ नदी बंधुनि॥ सर्वपदमंतोदात्तं बहुव्रीहौ॥ गार्गीबंधुः॥
१०९॥ निष्ठोपसर्गपूर्वमन्यतरस्यां॥ सर्वपदमंतोदात्तं बहुव्रीहौ॥ प्रक्षालितपादः॥ पक्षे गतिरनंतरः इत्याद्युदात्त
त्वं॥ ११०॥ उत्तरपदादिः॥ अधिकारसूत्रं॥ १११॥ कर्णो वर्णलक्षणात्॥ उत्तरपदादिरुदात्तो बहुव्रीहौ॥ शुक्लकर्णः॥ लक्ष
णात्॥ शंकुकर्णः॥ ११२॥ संज्ञौपम्ययोश्च॥ उत्तरपदादिः कर्ण उदात्तः॥ मणिकर्णः॥ औपम्ये॥ गोकर्णः॥ ११३॥
कंठपृष्ठग्रीवाजंघं च॥ संज्ञौपम्ययोरुत्तरपदादिरुदात्तो बहुव्रीहौ॥ शितिकंठः॥ काण्डपृष्ठः॥ सुग्रीवः॥ नाडीजंघः॥ औप

15

म्ये ॥ उष्ट्रकंठः ॥ गोपृष्ठः ॥ अश्वग्रीवः ॥ गोजंघः ॥ ११४ ॥ शृंगमवस्थायां च ॥ उत्तरपदादिरुदात्तो बहुव्रीहौ चात्संज्ञौपम्य
योः ॥ उद्गतशृंगः ॥ द्व्यंगुलशृंगः ॥ संज्ञायां ऋष्यशृंगः ॥ औपम्ये मेषशृंगः ॥ ११५ ॥ नञो जरमरमित्रमृताः ॥ उ
त्तरपदादय उदात्ताः ॥ बहुव्रीहौ ॥ अजरः ॥ अमरः ॥ अमित्रः ॥ अवोद्देवममृतं ॥ ११६ ॥ सोर्मनसी अलोमोषसी ॥ उत्तर
पदादी उदात्ते बहुव्रीहौ ॥ मन्त्र सुप्रज्ञायज्ञः ॥ अस्तु शिवा पशुभ्यः सुमनाः सुवर्चाः ॥ ११७ ॥ क्रत्वादयश्च ॥ सोः परे उदा
त्ताः ॥ साम्राज्याय सुक्रतुः ॥ क्रतु ॥ दृशीक ॥ प्रतीक ॥ प्रतूर्ति ॥ हव्य ॥ भव्य ॥ भग ॥ ११८ ॥ आद्युदात्तं द्व्यच्छन्दसि ॥ सो
रुत्तरपदमाद्युदात्तं बहुव्रीहौ ॥ नञ्सुभ्यामित्यस्यापवादः ॥ सुरथं ॥ आतिथिग्वे ॥ अधा स्वश्वाः ॥ रथाश्वशब्दौ नि
स्वरेणाद्युदात्तौ ॥ ११९ ॥ वीरवीर्यौ च ॥ सोरुत्तरपदावाद्युदात्तौ बहुव्रीहौ ॥ सुवीरेण रयिणा ॥ सुवीर्यस्य गोमतः ॥ १२०
कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ उत्तरपदमाद्युदात्तं ॥ उपकूलं ॥ परितीरं ॥ उपतूलं ॥ उपमूलं ॥ उपशा
लं ॥ उपाक्षं ॥ सुषमं ॥ निःषमं ॥ १२१ ॥ कंसमंथशूर्पपाय्यकांडं द्विगौ ॥ उत्तरपदमाद्युदात्तं ॥ द्विकंसः ॥ द्विमंथः ॥ द्विशूर्पः

द्विपाय्यं ॥ द्विकांडं ॥ १२२ ॥ तत्पुरुषे शालायां नपुंसके ॥ उत्तरपदमाद्युदात्तं ॥ ब्राह्मणशालं ॥ १२३ ॥ कंथा च ॥ उत्तरपद
माद्युदात्तं ॥ सौशमिकंथं ॥ १२४ ॥ आदिश्चिहणादीनां ॥ कंथांते तत्पुरुषे नपुंसके उदात्तः ॥ चिहणकंथं ॥ चिहणमड
र ॥ मद्दुरा वैतुलापटत्का वैडालिकर्णी ॥ कुक्कुट ॥ चिक्कण ॥ १२५ ॥ चेलखेटकटुककांडं गर्हायां ॥ उत्तरपदमाद्युदात्तं
पुत्रचेलं ॥ नगरखेटं ॥ दधिकटुकं ॥ प्रजाकांडं ॥ १२६ ॥ चीरमुपमानं ॥ उत्तरपदमाद्युदात्तं तत्पुरुषे ॥ वस्त्रं चीरमिव वस्त्र
चीरं ॥ कंबलचीरं ॥ १२७ ॥ पललसूपशाकं मिश्रे ॥ तत्पुरुषे उत्तरपदमाद्युदात्तं ॥ घृतपललं ॥ मूलकसूपः ॥ मुद्गशाकं
भक्ष्येण मिश्रीकरणमिति समासः ॥ १२८ ॥ कूलसूदस्थलकर्षाः संज्ञायां ॥ उत्तरपदान्याद्युदात्तानि तत्पुरुषे ॥ दाक्षिकूलं
देवसूदः ॥ माहकिस्थली ॥ दाक्षिकर्षः ॥ ग्रामसंज्ञा एताः ॥ १२९ ॥ अकर्मधारये राज्यं ॥ तत्पुरुषे उत्तरपदमाद्युदात्तं ॥ ब्राह्म
णराज्यं ॥ १३० ॥ वर्ग्यादयश्च ॥ उत्तरपदान्याद्युदात्तानि तत्पुरुषे ॥ अर्जुनवर्ग्यः ॥ वासुदेवपक्ष्यः ॥ दिगादिषु ये वर्ग्यादय
स्त एव यद्वंत्याः वर्ग्यादयः ॥ १३१ ॥ पुत्रः पुंभ्यः ॥ आद्युदात्तस्तत्पुरुषे ॥ दामकपुत्रः ॥ पुंभ्य इति किं ॥ दाक्षीपुत्रः ॥ १३२ ॥ नाचा
र्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः पुत्र आद्युदात्तस्तत्पुरुषे ॥ आख्याग्रहणात् पर्यायाणां तद्विशेषाणां च ग्रहणं ॥ आचार्य

16

र्यपुत्रः ॥ उपाध्यायपुः ॥ शाकटायनपुत्रः ॥ राजपुत्रः ॥ ईश्वरपुत्रः ॥ नंदपुत्रः ॥ ऋत्विक्पुत्रः ॥ राजकपुत्रः ॥ स्त्विक्पुत्रः
संयुक्ताः संबंधिनः ॥ शालपुत्रः ॥ ज्ञातयो मातृपितृसंबंधेन बांधवाः ॥ ज्ञातिपुत्रः ॥ भ्रातुष्पुत्रः ॥ १३३ ॥ चूर्णादीन्य
प्राणिषष्ठ्याः ॥ उत्तरपदान्याद्युदात्तानि तत्पुरुषे ॥ मुद्गचूर्णं ॥ चूर्ण ॥ चरिव ॥ करिप ॥ शाकिन ॥ शाकट ॥ द्राक्षा ॥ तूस्त
कुंदुम ॥ दलप ॥ चमसी ॥ चक्कन ॥ चौल ॥ १३४ ॥ षट्कांडादीनि ॥ अप्राणिषष्ठ्या आद्युदात्तानि ॥ चेलखेट कटुक कांडमि
ति कांडशब्दादारभ्य कूलसूदेति सूदांतानि षट् कांडादीनि ॥ दर्भकांडं ॥ दर्भचीरं ॥ तिलपललं ॥ मुद्गसूपः ॥ मूलकशा
कं ॥ नदीकूलं ॥ षद्भिं ॥ राजसूदः ॥ १३५ ॥ कुंडवनं ॥ उत्तरपदमाद्युदात्तं तत्पुरुषे ॥ दर्भकुंडं नाम वनं ॥ १३६ ॥ प्रकृत्या भगालं
तत्पुरुषे उत्तपदं ॥ कुंभीभगालं ॥ १३७ ॥ शितेर्नित्याबह्वज्बहुव्रीहावभसत् ॥ उत्तरपदं प्रकृत्या ॥ शितिपादः ॥ शित्यंसः ॥ नित्यग्रहणं किं
शिति ॥ ककुत् ॥ ककुदस्यावस्थायां लोप इत्यावस्थातोन्यत्र शितिककुद इति बह्वज्युत्तरपदं भवति ॥ अभसत् किं ॥ शितिभ
सत् ॥ १३८ ॥ गतिकारकोपपदात्कृत् ॥ उत्तरपदं प्रकृत्या तत्पुरुषे ॥ प्रकारकः ॥ प्रहरणं ॥ उपपदात् ॥ उच्चैःकारं ॥ ईषत्करः ॥ १३९ ॥ राम: ॥ ३६ ॥

उभेवनस्पत्यादिषुयुगपत्॥ एर्वौत्तरपदे प्रकृत्या॥ होतायक्षद्वनस्पतिं॥ बृहस्पतयेत्वा॥ हर्षयाशचीपतिं॥ तनूनपा
द्सुरः॥ नराशंसः॥ प्रतिश्रुतः॥ शुनःशेपः॥ शंडामर्कौ॥ तृष्णावरूत्री॥ बिंबाविश्वावयसौ॥ मर्मृत्युः॥ १४०॥ देवता
द्वंद्वे च॥ उभेयुगपत्प्रकृत्या॥ शंनइंद्रावरुणा॥ इंद्राबृहस्पतीवयं॥ १४१ नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमं
थिषु॥ प्रागुक्तं॥ शंनइंद्राग्नी॥ पृथिव्यादेः किं॥ द्यावापृथिवी॥ तनयत्रासोमा॥ रुद्रे॥ इंद्रापूषणौ॥ शुक्रामं
थिनौ॥ १४२॥ अंतः॥ अधिकारसूत्रं॥ १४३ थाथघञ्क्ताजबित्रकाणां॥ गतिकारकोपपदादंत उदात्तः॥ थ॥ अव
भृथः॥ अथ॥ आवसथः॥ उपवसथः॥ घञ्॥ प्रभेदः॥ क्त॥ धर्त्तावज्री पुरुष्टुतः॥ अज्॥ प्रक्षयः॥ अप्॥ प्रलवः॥
इत्र॥ प्रलवित्रं॥ क॥ प्रवृषः॥ १४४॥ सूपमानात्क्तः॥ अंतोदात्तः॥ क्तांतस्यायो नौ सुकृतस्य॥ उपमात्॥ वृकावलुप्तं॥ १४५
संज्ञायामनाचितादीनां॥ गतिकारकोपपदात्क्तांतमंतोदात्तं॥ उपहूतः शाकल्यः॥ परिजग्धः॥ कौंडिन्यः॥ नेह आ
चितं॥ पर्याचितं॥ आस्थापितं॥ परिगृहीतं॥ निरुक्तं॥ प्रतिपन्नं॥ अपश्लिष्टं॥ उपहूतं॥ उपस्थितं॥ संहितागवि॥ १४६॥

17

प्रवृद्धादीनांच ॥ अंतउदात्तः ॥ प्रवृद्धः ॥ प्रयुक्तः ॥ अवहितः ॥ खट्वारूढः ॥ कविशस्तः ॥ आकृतिगणोयं पुनरुत्स्यूतं वासो
देयं ॥ १३७ ॥ कारकाद्दत्तश्रुतयोरेवाशिषि ॥ संज्ञायामंतउदात्तः ॥ देवदत्तः ॥ विष्णुश्रुतः ॥ देवाएनं देयासुः विष्णुरेनं श्रूया
दितिचार्थः ॥ १३८ ॥ इत्थंभूतेन कृतमितिच ॥ अस्मिन्नर्थे यः समासस्तत्र क्तांतमुत्तरपदमंतोदात्तं ॥ प्रमत्तगीतं ॥ सुप्तप्र
लपितं ॥ १४९ ॥ अनोभावकर्मवचनः ॥ कारकादंतोदात्तः ॥ भावे ॥ पयःपानं सुखं ॥ कर्मणि राजभोजनाः शालयः ॥ १५० ॥
मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥ कारकादुत्तरपदान्यंतोदात्तानि तत्पुरुषो ॥ रथवर्त्म ॥ पाणि
णिकृतिः ॥ छंदोव्याख्यानं ॥ राजशयनं ॥ राजासनं ॥ अश्वस्थान ॥ याजकादयस्तूक्ताः ॥ ब्राह्मणयाजकः ॥ गोक्री
तः ॥ व्याख्यानादीनां ल्युडंतानामभावकर्मार्थवचनं ॥ १५१ ॥ सप्तम्याः पुण्यं ॥ अंतोदात्तं ॥ अध्ययनपुण्यं ॥ १५२ ॥
ऊनार्थकलहं तृतीयायाः ॥ अंतोदात्तं ॥ माषोनं ॥ माषविकलं वाक्कलहः ॥ १५३ ॥ मिश्रं चानुपसर्गमसंधौ ॥ अंतोदात्तं
तिलमिश्राः ॥ गुडमिश्राः ॥ नेहा तिलसंमिश्राः ॥ पणबंधेनैकार्थ्यं संधिः ॥ असंधौ किं ॥ ब्राह्मणमिश्रो राजा ॥ १५४ ॥

नञोगुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः ॥ अंतोदात्ताः ॥ संपादिनि ॥ अकार्णवेष्टकिकं मुखं ॥ अर्हे अच्छैदि
कः ॥ हिते ॥ अवत्सीयः ॥ अलमर्थे ॥ असांतापिकः ॥ १५५ ॥ ययतोश्चातदर्थे ॥ गुणप्रतिषेधे नञः परयोरंतउदात्तः ॥
अदंत्यं ॥ अपाश्या ॥ तदर्थे तु ॥ अपाद्यं ॥ १५६ ॥ अच्कावशक्तौ ॥ नञः परावंतोदात्तौ ॥ अपचः ॥ पक्तुं न शक्तः ॥ अलि
खः ॥ १५७ ॥ आक्रोशे ॥ नञः परावच्कावंतोदात्तौ ॥ अपचो जाल्मः पक्तुं शक्तोपि न पचतीत्येवमाक्रोश्यते ॥ १५८ ॥ संज्ञायां
नञः परमंतोदात्तमाक्रोशे ॥ अदेवदत्तः ॥ १५९ ॥ कृत्योकेष्णुच्चार्वादयश्च ॥ नञः परेंतोदात्ताः ॥ अकर्त्तव्यः ॥ उक ॥ अना
गामुकः ॥ इष्णुच् ॥ अनलंकरिष्णुः ॥ अनाढ्यंभविष्णुः ॥ चार्वादि ॥ अचारुः ॥ असाधुः ॥ चारु ॥ साधु ॥ यौधिका अनंगमे
जय ॥ वदान्य ॥ अकस्मात ॥ वर्त्तमान ॥ त्वरमाण ॥ ध्रियमाण ॥ क्रियमाण ॥ रोचमान ॥ शोभमाना विकार ॥ सहृश ॥ गृह
पति ॥ गृहपतिकः ॥ राजाह्नोश्छंदसि ॥ १६० ॥ विभाषा त्वन्नतीक्ष्णशुचिषु ॥ नञः परष्वंतउदात्तः ॥ त्वन् ॥ अकर्त्ता ॥ अ
न्नं ॥ अतीक्ष्णं ॥ अशुचि ॥ पक्षे व्ययस्वरः ॥ १६१ ॥ बहुब्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ अंतोदात्तः

18

इदंप्रथमं यस्य स इदंप्रथमः॥ इदंद्वितीयः॥ तत्पंचमः॥ १६२॥ संख्यायास्तनः॥ वहुव्रीहावंतोदात्तः॥ द्विस्तना॥ चतुस्तना
१६३॥ विभाषा छंदसि॥ सर्वोक्तौ द्विस्तनां करोति॥ १६४॥ संज्ञायां मित्रजिनयोः॥ वहुव्रीहावंतोदात्तः॥ देवमित्रः॥ कृष्णा
जिनं॥ मित्रे ऋषिप्रतिषेधः॥ विश्वामित्र ऋषिः॥ १६५॥ व्यवायिनोंतरं॥ व्यवधानवाचकात्परमंतोदात्तं वहुव्रीहौ॥ वस्त्रां
तरः॥ वसनांतरः॥ १६६॥ मुखं स्वांगं॥ वहुव्रीहावंतोदात्तं॥ गौरमुखः॥ १६७॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुव
त्सेभ्यः॥ मुखं स्वांगं वहुव्रीहावंतोदात्तं॥ अव्यय॥ उच्चैर्मुखः॥ दिक्शब्द॥ प्राङ्मुखः॥ गोमुखः॥ महामुखः॥ स्थूल
मुखः॥ मुष्टिमुखः॥ पृथुमुखः॥ वत्समुखः॥ १६८॥ निष्ठोपमानादन्यतरस्यां॥ मुखं स्वांगमंतोदात्तं वहुव्रीहौ॥ निष्ठायाः
प्रक्षालितमुखः॥ उपमानात्॥ सिंहमुखः॥ १६९॥ जातिकालसुखादिभ्योनाच्छादनात्क्तोकृतमितप्रतिपन्नाः॥ व
हुव्रीहावंतोदात्ताः॥ शार्ङ्गजग्धः॥ मासजातः॥ सुखजातः॥ दुःखजातः॥ नेहा वस्त्रछन्नः॥ अकृतेत्यादि किं
कुंडकृतः॥ कुंडमितः॥ कुंडप्रतिपन्नः॥ १७०॥ वा जाते॥ जातिकालसुखादिभ्यो जातमंत उदात्तो वहुव्रीहौ॥ दंतजातः

राम॥
॥१८॥

मासजातः॥१७१॥नञ्सुभ्यां॥बहुव्रीहावुत्तरपदमंतोदात्तं॥अव्रीहिः॥सुमाषः॥१७२॥कपिपूर्वं॥नञ्सुभ्यामुत्तरपदमुदात्तं
बहुव्रीहौ॥अब्रह्मबंधुकः॥सुकुमारिकः॥१७३॥ह्रस्वांतेंत्यात्पूर्वं॥उत्तरपदे ह्रस्वांते बहुव्रीहौ वंत्यात्पूर्वमुदात्तं कपि नञ्सु
भ्यां॥अव्रीहिकः॥सुमाषकः॥१७४॥बहोर्नञ्वदुत्तरपदभूम्नि॥नञइव नञ्वत् नञ्सुभ्यामित्युक्तं॥बहुव्रीहिकः॥
बहुमित्रकः॥१७५॥नगुणादयोवयवाः॥बहोरुत्तरे नांतोदात्ता बहुव्रीहौ॥बहुगुणा रज्जुः॥बह्वक्षरं पदं॥बह्वध्यायः
आकृतिगणोयं॥१७६॥उपसर्गात्स्वांगं ध्रुवमपर्शु॥अंतोदात्तं बहुव्रीहौ॥ध्रुवमेकरूपं॥प्रपृष्ठः॥प्रललाटः॥नेह
विपर्शुः॥ध्रुवं किं॥उद्बाहुः॥१७७॥वनं समासे॥उपसर्गादंतोदात्तं॥समास इति॥समासमात्रोपलक्षकं बहुव्रीहावेव
हि स्यात्॥प्रवणे यष्टव्यं॥१७८॥अंतः॥अस्मात्परं वनमंतोदात्तं॥अंतर्वणो देशः॥अनुपसर्गार्थमिदं॥१७९॥अं
तश्च॥उपसर्गादंतोदात्तः॥पर्यंतः॥समंतः॥१८०॥न निविभ्यां॥अंतःशब्दोंतोदात्तः॥न्यंतः॥व्यंतः॥१८१॥परेरभितो
भाविमंडलं॥समासेंतोदात्तोदात्तं॥अभितोभावि कूलादि॥परिकूलं परिमंडलं॥१८२॥प्रादस्वांगं संज्ञायां॥उत्तरपदमंतो

19 दात्तं ॥ प्रकोष्ठः ॥ प्रगृहं ॥ १८३ ॥ निरुदकादीनि च ॥ अंतोदात्तानि ॥ निरुदकं ॥ निरुल्लकं ॥ निरुपलं ॥ निर्मक्षिकं ॥ निर्मशकं
निष्कालकं ॥ निष्पेषे ॥ दुस्तरीयं ॥ निस्तरीकं ॥ निरजिनं ॥ उपाजिनं ॥ परेर्हस्तपादकेशकर्षाः ॥ आकृतिगणोयं ॥ १८४ ॥
अभेर्मुखं ॥ अंतोदात्तं ॥ अभिमुखं ॥ १८५ ॥ अपाच्च ॥ मुखमंतोदात्तं ॥ अपमुखं ॥ १८६ ॥ स्फिगपूतवीणांजोध्वकु
क्षिसीरनामनाम च ॥ अपादंतोदात्तं ॥ अपस्फिगं ॥ अपपूतं ॥ अपवीणं ॥ अपांजः ॥ अपाध्वा ॥ अपकुक्षि
सीरनाम ॥ अपसीरं ॥ अपहलं ॥ अपनाम ॥ १८७ ॥ अधेरुपरिस्थं ॥ अंतोदात्तं ॥ अध्यारूढो दंतोधिदंतः ॥
१८८ ॥ अनोरप्रधानकनीयसी ॥ अंतोदात्ते ॥ अनुगतो ज्येष्ठमनुज्येष्ठः ॥ अनुकनीयान् ॥ अप्रेति किं ॥ अनुगतो
ज्येष्ठोनुज्येष्ठः ॥ १८९ ॥ पुरुषश्चान्वादिष्टः ॥ अनोः परोंतोदात्तः ॥ अन्वादिष्टः पुरुषोनुपुरुषः ॥ १९० ॥ अतेरकृ
त्पदे ॥ अंतोदात्ते ॥ अत्यंकुशो नागः ॥ अतिपदा गायत्री निर्हि ॥ अतिकारकः ॥ १९१ ॥ नेरनिधाने ॥ उत्तरपदमंतो
दात्तं ॥ निधानमप्रकाशता ततोन्यत्र ॥ निमूलं ॥ न्यक्षं ॥ १९२ ॥ प्रतेरंश्वादयस्तत्पुरुषे ॥ अंतोदात्ताः ॥ प्रतिगतो राम. १९

प्र सं भु

पुः॥ प्रतिजनः॥ प्रतिराजा॥ अंशुजन॥ राजन्॥ उष्ट्र॥ खेरक॥ अजिर॥ आर्द्रा॥ श्रवणा॥ कृत्तिका॥ अर्द्धपुर॥ १९३॥ उपाद्व्यजजि
नमगौरादिभ्यः॥ अंतोदात्तं तत्पुरुषे॥ उपदेवः॥ उपेंद्रः॥ उपाजिने॥ नेह॥ उपगौरः॥ गौर॥ तैष॥ लेट॥ लोट॥ जिह्वा॥ कृष्णा॥ कन्या
गुत्सः॥ कत्य॥ पाद॥ १९४॥ सोरवक्षेपणे॥ उत्तरपदमंतोदात्तं तत्पुरुषे॥ सुप्रत्यवसितः॥ १९५॥ विभाषोत्पुच्छे॥ अंतोदात्तः॥ उत्क्रां
तः पुच्छादुत्पुच्छः॥ १९६॥ द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ॥ अंतोदात्तो विभाषा॥ द्विपाच्च तुष्पाद्दस्माकं॥ त्रिपादूर्द्धः॥ द्विदन्
त्रिमूर्द्धा त्रिदन्॥ द्विमूर्द्धानि सक्तरश्मिन्॥ १९७॥ सक्थं चाक्रांतात्॥ बहुव्रीहौ विभाषांतोदात्तं गौरसक्थ्यः॥ पक्षे पचश्चित्वादंतोदात्तं
अक्रांतात्किं॥ चक्रसक्थ्यः॥ १९८॥ परादिश्छंदसि बहुलं॥ अंतोदात्तः परशब्देनात्र सक्थ्यशब्द एव गृह्यते॥ अंजिसक्थ्यमा
लभेत॥ १९९॥ इति पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहे॥ पादोध्यायस्य षष्ठस्य द्वितीयोयं समर्थितः॥ अलुगुत्तरपदे॥ अ
धिकारसूत्रं॥ १॥ पंचम्याः स्तोकादिभ्यः॥ अलुगुत्तरपदे॥ स्तोकादयः स्तोकांतिकदूरार्थे त्रिसूत्रोक्तः॥ स्तोकान्मुक्तः॥ अं
तिकादागतः॥ दूरादागतः॥ कृच्छ्रादागतः॥ २॥ ओजःसहोंभस्तमसस्तृतीयायाः॥ अलुगुत्तरपदे॥ ओजसाकृतं॥ सहसाकृतं॥ अंभसाकृतं॥ तमसाकृतं

२० पुंसानुजो ॥ जनुषांध इत्युपसंख्यानं ॥ ३ ॥ मनसः संज्ञायां ॥ तृतीयाया अलुगुत्तरपदे ॥ मनसागुप्ता ॥ ४ ॥ आज्ञायिनिच
उत्तरपदे मनसस्तृतीयाया अलुक् ॥ मनसाज्ञायी ॥ ५ ॥ आत्मनश्च ॥ तृतीयाया अलुगुत्तरपदे ॥ पूरण इति वक्तव्यं ॥ आत्म
नापंचमः ॥ आत्मनश्च पूरण इति वक्तव्यं ॥ आत्मनापंचमः ॥ आत्मनश्च पूरण इति संपूर्णमेव वार्त्तिकमिति हरदत्तः ॥ ६ ॥
वैय्याकरणाख्यायां चतुर्थ्याः ॥ अलुगुत्तरपदे आत्मनः ॥ आत्मनेपदं आत्मनेभाषः ॥ ७ ॥ परस्य च ॥ चतुर्थ्या अलुगुत्त
रपदे वैय्याकरणाख्यायां ॥ परस्मैपदं ॥ परस्मैभाषः ॥ ८ ॥ हलदंतात्सप्तम्याः संज्ञायां ॥ अलुगुत्तरपदे ॥ त्वचिसारः ॥ युधिष्ठि
रः ॥ अदंतात् ॥ अरण्येतिलकाः ॥ वनेकसेरुकाः ॥ ९ ॥ कारनाम्नि च प्राचां हलादौ ॥ उत्तरपदे सप्तम्या अलुक् हलदंतात् ॥ दृषदि
माषकः ॥ मुकुटेकार्षापणः ॥ १० ॥ मध्याद्गुरौ ॥ उत्तरपदे सप्तम्या अलुक् ॥ मध्येगुरुः ॥ अंताच्च ॥ अंतेगुरुः ॥ ११ ॥ अमूर्द्धमस्त
कात्स्वांगादकामे ॥ सप्तम्या अलुगुत्तरपदे ॥ कंठेकालः ॥ उरसिलोमा ॥ नेह मूर्द्धशिखः ॥ मस्तकशिखः ॥ १२ ॥ बंधे च विभाषा
उत्तरपदे हलदंतात्सप्तम्याः अलुक् ॥ हस्तेबंधः ॥ हस्तबंधः ॥ चक्रेबंधः चक्रबंधः ॥ १३ ॥ तत्पुरुषे कृति बहुलं ॥ उत्तरपदे सम. ॥ २० ॥

सप्तम्या अलुक् ॥ स्तंबेरमः ॥ कर्णेजपः ॥ क्वचिन्न ॥ कुरुचरः ॥ १४ ॥ प्रावृट्शरत्कालदिवां जे ॥ सप्तम्या अलुगुत्तरपदे प्रावृ-
षिजः ॥ शरदिजः ॥ कालेजः ॥ दिविजः ॥ सर्वस्यायं प्रपंचः ॥ १५ ॥ विभाषा वर्षक्षरशरवरात् ॥ सप्तम्या अलुगुत्तरपदे जे ॥ व-
र्षेजः ॥ वर्षजः ॥ इत्यादि ॥ १६ ॥ घकालतनेषु कालनाम्नः ॥ सप्तम्या विभाषा अलुगुत्तरपदेषु ॥ घ ॥ पूर्वाह्णेतरे पूर्वा-
ह्णेतमे ॥ काल ॥ पूर्वाह्णेकाले ॥ तन ॥ पूर्वाह्णेतने ॥ पक्षे लुक् ॥ १७ ॥ शयवासवासिष्वकालात् ॥ सप्तम्या विभाषा अलुगु-
त्तरपदेषु खेशयः ॥ ग्रामेवासः ॥ ग्रामेवासी ॥ अकालात् किं ॥ पूर्वाह्णशयः ॥ १८ ॥ नेन सिद्धबध्नातिषु ॥ उत्तरपदेषु सप्तम्या अ-
लुक् ॥ इन ॥ स्थंडिलवर्ती ॥ सांकाश्यसिद्धः ॥ चक्रबद्धः ॥ १९ ॥ स्थे च भाषायां ॥ उत्तरपदे सप्तम्या नालुक् ॥ समस्थः ॥ विषम-
स्थः ॥ भाषायां किं ॥ कृष्णोस्याखरेष्ठः ॥ २० ॥ षष्ठ्या आक्रोशे ॥ अलुगुत्तरपदे ॥ चौरस्यकुलं ॥ वाग्दिक्पश्यद्भ्यो युक्तिदं-
डहरेषु ॥ वाचोयुक्तिः ॥ दिशोदंडः ॥ पश्यतोहरः ॥ आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च ॥ २१ ॥ पुत्रेन्यतरस्यां
उत्तरपदे षष्ठ्या अलुगाक्रोशे ॥ दास्याःपुत्रः ॥ दासीपुत्रः ॥ २२ ॥ ऋतो विद्यायोनिसंबंधेभ्यः ॥ षष्ठ्या अलुगुत्तरपदे ॥ होतु

21 रंतेवासी ॥ होतुःपुत्रः ॥ पितुःपुत्रः ॥ पितुरंतेवासी ॥ २३ ॥ विभाषास्वसृपत्योः ॥ उत्तरपदयोर्विद्यायोनिसं ॥ बंधवाचिभ्यो ऋदंते
भ्यः षष्ठ्या अलुक् ॥ मातुःस्वसा ॥ मातृष्वसा ॥ पितुःस्वसा ॥ पितृष्वसा ॥ पितिर्दुहितुःपतिः ॥ दुहितृपतिः ॥ २४ ॥ आनङृतो द्वंद्वे
विद्यायोनिसंबंधवाचिन उत्तरपदे ॥ होतापोतारौ ॥ नेष्टोद्गातारौ ॥ योनिसंबंधानां ॥ मातापितरौ ॥ २५ ॥ देवताद्वंद्वे च ॥ उत्तरपदे आनङ्
इंद्रावरुणौ ॥ इंद्राबृहस्पती ॥ पुनर्द्वंद्वग्रहणं प्रसिद्धसाहचर्यपरिग्रहार्थं ॥ तेनेह न ॥ ब्रह्मप्रजापती ॥ २६ ॥ ईदग्नेः सोमवरुणयोः
उत्तरपदयोर्देवताद्वंद्वे ॥ अग्नीषोमौ ॥ अग्नीवरुणौ ॥ २७ ॥ इद्वृद्धौ ॥ उत्तरपदे देवताद्वंद्वे अग्नेः ॥ आग्निवारुणीमनड्वाहीं
विष्णोन ॥ आग्नावैष्णवं ॥ २८ ॥ दिवो द्यावा ॥ देवताद्वंद्वे उत्तरपदे ॥ द्यावाक्षामा ॥ द्यावाभूमी ॥ २९ ॥ दिवसश्च पृथिव्यां ॥ उत्तर
पदे देवताद्वंद्वे दिवः ॥ चाद्यावा ॥ दिवस्पृथिव्यौ ॥ द्यावापृथिव्यौ ॥ ३० ॥ उषासोषसः ॥ देवताद्वंद्वे उत्तरपदे ॥ उषासानक्ता ॥ ३१ ॥
मातरपितरावुदीचां ॥ निपात्यते ॥ प्राचां तु मातापितरौ ॥ ३२ ॥ पितरामातरा च छंदसि ॥ निपात्यते ॥ आमागंतां पितरामातरा चामा राम.
३३ ॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ दर्शनीया भार्या यस्य स दर्शनीयभार्यः ॥ शोभ ॥ २२ ॥

नभार्यः॥ दीर्घजंघः॥ भाषितपुंस्कात्किं॥ गंगाभार्यः॥ अनूङ् किं॥ वामोरुभार्यः॥ पूरणी प्रियादीनां तु॥ कल्याणी पंच
मारात्रिः॥ कल्याणी प्रियाः॥ प्रिया मनोज्ञा॥ कल्याणी॥ सुभगा॥ दुर्भगा॥ भक्तिः॥ सचिवा॥ स्वसा॥ कांता॥ क्षांता॥ चप
ला॥ दुहिता॥ समा॥ वामना॥ ३४॥ तसिलादिष्वाकृत्वसुचः॥ स्त्रियाः पुंवत्॥ ततः शालायाः॥ तत्र शालायाः॥ त्रतसो त
रप्तमपौ॥ चरट्॥ जातीयरौ॥ कल्पप्देशीयरौ॥ रूपप्पाशपौ॥ थाल्॥ तिल्थ्यनौ॥ शसि बह्वल्पार्थस्य॥ बह्वी
भ्यो देहि बहुशः॥ अल्पशः॥ त्वतलोर्गुणवचनस्य॥ शुक्लत्वं॥ शुक्लता॥ भस्याढे तद्धिते॥ हास्तिनीनां समूहो हा
स्तिकं॥ नेह॥ रौहिणेयः॥ ३५॥ क्यङ्मानिनोश्च॥ स्त्रियाः पुंवत्॥ एनी वा चरत्येतायते॥ श्येतायते॥ दर्शनीयामिमां म
न्यते दर्शनीयमानी॥ ३६॥ न कोपधायाः स्त्रियाः पुंवत्॥ तद्धितवुग्रहणं कर्त्तव्यं॥ मद्रिकायते॥ मद्रिकाभार्यः
पाचिकाभार्यः॥ रसिकाभार्यः॥ ३७॥ संज्ञापूरण्योश्च॥ स्त्रियान पुंवत्॥ दत्ताभार्यः पंचमीभार्यः॥ ३८॥ वृद्धिनिमित्तस्य
च तद्धितस्यारक्तविकारे॥ स्त्रियान पुंवत्॥ वृद्धिनिमित्तस्येति बहुव्रीहिः॥ वृद्धेर्निमित्तं यस्मिन्निति॥ स्रौघ्नीभार्यः॥ ३९॥ सांगा

चोतः॥ स्त्रियान्नपुंवत्॥ सुकेशीभार्यः॥ अमानिनीतिवक्तव्यं॥ सुकेशमानिनी॥ ४०॥ जातेश्च॥ स्त्रियान्नपुंवत्॥ कठी
भार्यः॥ बह्वृचीभार्यः अमानिनीत्येव॥ कठमानिनी॥ ४१॥ पुंवत्कर्मधारयजातीयदेशीयेषु॥ भाषितपुंस्कादनूङः
स्त्रियाः॥ पाचकवृंदारिका॥ पाचकजातीया॥ पाचकदेशीया॥ कुक्कुट्यादीनामंडादिषु॥ कुक्कुट्या अंडं कुक्कुटां
डं॥ मृगपदं॥ मृगक्षीरं॥ काकशावः॥ ४२॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः॥ भाषितपुंस्का
त्॥ घ॥ ब्राह्मणितरा॥ रूप॥ ब्राह्मणिरूपा॥ ब्राह्मणिकल्पा॥ ब्राह्मणिचेली॥ ब्राह्मणिब्रुवा॥ ब्राह्मणिगोत्रा॥ ब्राह्मणि
मता॥ ब्राह्मणिहता॥ ४३॥ नद्याः शेषस्यान्यतरस्यां॥ घादिषु ह्रस्वः॥ अङीनद्यंतं चेत्काजिह शेषः॥ ब्रह्मबंधू
तरा॥ ब्रह्मबंधुतरा॥ स्त्रीतरा॥ स्त्रितरा॥ कृन्नद्यान॥ लक्ष्मीतरा॥ ४४॥ उगितश्च॥ परयानद्या घादिषु ह्रस्वोन्यतर
स्यां॥ श्रेयसीतरा॥ श्रेयसितरा॥ ४५॥ आन्महतः समानाधिकरणजातीययोः॥ महादेवः॥ महाजातीयः॥ अ
ष्टनः कपाले हविषि॥ अष्टाकपालः॥ गविचयुक्ते॥ अष्टागवं शकटं॥ ४६॥ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः

[illegible]तो ॥ आत ॥ द्वादश ॥ द्वाविंशतिः ॥ अष्टादश ॥ अष्टाविंशतिः ॥ बहुव्रीह्यशीत्योरुक्त ॥ द्विशः ॥ द्व्यशीतिः ॥ प्राकु
शतादिति वक्तव्यं ॥ नेह ॥ द्विशतं ॥ द्विसहस्रं ॥ ४७ त्रेस्त्रयः ॥ सख्यायामुत्तरपदेऽबहुव्रीह्यशीत्योः ॥ त्रयोदश त्रयोविं
शतिः ॥ नेह ॥ त्रिदशाः ॥ त्र्यशीतिः ॥ प्राकृशतादित्येव ॥ त्रिशतं ॥ त्रिसहस्रं ॥ ४८ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां ॥ द्व्य
ष्टनोस्त्रेश्च प्रागुक्तं ॥ द्वाचत्वारिंशत ॥ द्विचत्वारिंशत ॥ अष्टाचत्वारिंशत ॥ अष्टचत्वारिंशत ॥ त्रयश्चत्वारिंशत ॥ त्रिच
त्वारिंशत ॥ एवं पंचाशत्षष्टिसप्ततिनवतिषु ॥ ४९ ॥ हृदयस्य हृल्लेखयदण्लासेषु ॥ हृल्लेखः ॥ हृद्यः ॥ हार्दं
हृल्लासः ॥ ५० ॥ वा शोकष्यञ्रोगेषु ॥ हृदयस्य हृत ॥ हृच्छोकः ॥ सौहार्द्यं ॥ हृद्रोगः ॥ पक्षे हृदयशोक इत्यादि
५१ ॥ पादस्य पदाज्यातिगोपहतेषु ॥ उत्तरपदेषु ॥ पदाजिः ॥ पदातिः ॥ पदगः ॥ पदोपहतः ॥ ५२ ॥ पद्यत्यतदर्थे
पादस्य ॥ पादौ विध्यंति पद्याः कंटकाः ॥ अतदर्थ इति किं ॥ पादार्थमुदकं पाद्यं ॥ ५३ ॥ हिमकाषिहतिषु च
उत्तरपदेषु पादस्य पद् ॥ पद्धिमं ॥ पत्काषी ॥ पद्धतिः ॥ ५४ ॥ ऋचः शे ॥ पादस्य पद् ॥ पच्छो गायत्रीं शंसति ॥ ५५ ॥

24

याघोषमिश्रशब्देषु ॥ उत्तरपदेषुपादस्यपद् ॥ पद्घोषः ॥ पन्मिश्रः ॥ पच्छब्दः । पक्षेपादघोषइत्यादि ॥ ५६ ॥ उदक
स्योदः संज्ञायां ॥ उत्तरपदे ॥ औष्यान्यहंपादिकमोदवाहिं ॥ ५७ ॥ पेषंवासवाहनधिषुच ॥ उत्तरपदेषुउदकस्योदः
उदमेषंपिनष्टि ॥ उदवासः ॥ उदवाहनः ॥ उदधिः ॥ ५८ ॥ एकहलादौपूरयितव्येन्यतरस्यां ॥ उदकस्योदउत्तरपदे
उदकुंभः एकहलादौकिं ॥ उदकस्थाली ॥ ५९ ॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषुच ॥ उत्तरपदेष्वुदकस्योदः
अन्यतरस्यां ॥ उदमंथः ॥ उदकमंथइत्यादि ॥ ६० ॥ इकोह्रस्वोङ्योगालवस्य उत्तरपदे ॥ ग्रामणिपुत्रः ॥ ब्रह्मबंधुपुत्रः
अङ्यः किं ॥ गार्गीपुत्रः ॥ इयङुवङ्भाविनामव्ययानांचन ॥ श्रीकुलं ॥ भ्रूकुलं ॥ कांडीभूतः ॥ अभ्रुकुंसादीनां ॥ भ्रू
कुंसः ॥ भ्रुकुंसः ॥ भ्रूकुटिः ॥ भ्रुकुटिः ॥ अकारोनेनविधीयतइतिव्याख्यांतरं ॥ भ्रकुंसः ॥ भ्रकुटिः ॥ ६१ ॥ एकतद्धि
तेच ॥ चाउत्तरपदेह्रस्वः ॥ एकस्याआगतमेकरूप्यं ॥ एकमयं ॥ एकक्षीरं ॥ एकदुग्धं ॥ ६२ ॥ ङ्यापोः संज्ञाछंद
सोर्बहुलं ॥ ह्रस्वः ॥ रेवतिपुत्रः ॥ कालिदासः ॥ आपः ॥ शिलवहस्तं ॥ क्वचिन्नानांदीघोषः ॥ ६३ ॥ त्वेचाङ्यापोर्बहुलंह्र राम.
॥ २४ ॥

स्वः॥ छंदसि॥ अजत्वं॥ अजात्वं॥ ६४॥ इष्टकेषीकामालानां चिततूलभारिषु॥ उत्तरपदे षु ह्रस्वः॥ पक्वेष्टकचितं॥ इषीकतूलं
मालभारी॥ ६५॥ खित्यनव्ययस्य॥ उत्तरपदे ह्रस्वः॥ कालिंमन्या॥ नेह॥ दोषामन्यः॥ ६६॥ अरुर्द्विषदजंतस्य मुम्॥ खि
त्युत्तरपदेऽनव्ययस्य॥ अरुंतुदः॥ द्विषंतपः॥ जनमेजयः॥ ६७॥ इच एकाचोम्प्रत्ययवच्च॥ खित्युत्तरपदे॥ स्त्रियंम
न्यः॥ नरंमन्यः॥ गांमन्यः॥ ६८॥ वाचंयमपुरंदरौ च॥ निपात्येते॥ ६९॥ कारे सत्यागदस्य॥ उत्तरपदे मुम्॥ सत्यंकारः॥ अ
गदंकारः॥ अस्तोश्च॥ अस्तुंकारः॥ गिलेऽगिलस्य॥ तिमिंगिलः॥ ७०॥ श्येनतिलस्य पाते ञे॥ मुम्॥ श्येनंपाता मृगया॥ ते
लंपाता स्वधा॥ ७१॥ रात्रेः कृति विभाषा॥ उत्तरपदे मुम्॥ रात्रिंचरः॥ रात्रिचरः॥ ७२॥ नलोपो नञः॥ उत्तरपदे अब्राह्मणः॥ ७३॥
तस्मान्नुडचि॥ उत्तरपदे॥ तस्मादिति लुप्तनकारान्नञः॥ अनश्वः॥ अनुष्टुः॥ ७४॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकु
लनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या॥ नञ्॥ पादिति शत्रंतः॥ वेदा इत्यसुन्नंतः॥ ७५॥ एकादिश्चैकस्य चादुक्॥ नञ्
प्रकृत्या॥ एकेन न विंशतिरेकान्नविंशतिः॥ एकान्नत्रिंशत्॥ ७६॥ नगोऽप्राणिष्वन्यतरस्यां॥ नञ् प्रकृत्या॥ नगाः पर्वताः

25

अणवा ॥ ७७ ॥ सहस्य सः संज्ञायां ॥ उत्तरपदे ॥ साश्वत्थं ॥ सपलाशं ॥ ७८ ॥ ग्रंथांताधिके च ॥ सहस्य स उत्तरपदे ॥ सकलं ज्योतिषम
धीते ॥ समुहूर्तं ॥ अंतवचन इत्यव्ययीभावः ॥ अधिको सद्रोणा खारी ॥ समाषः कार्षापणः ॥ ७९ ॥ द्वितीये चानुपाख्ये ॥ स
हस्य स उत्तरपदे ॥ द्वितीय इति द्वयोः सह युक्तयोरप्रधानं यः स उच्यते ॥ अनुपाख्यः प्रत्यक्षमनुपलभ्यमानः ॥ सपि
शाचा वात्या ॥ सराक्षसीका निशा पिशाचादयः साक्षादनुपलभ्यमाना वात्यादिभिरनुमीयमाना अनुपाख्या भवंति ॥ ८० ॥
अव्ययीभावे चाकाले ॥ सहस्य सः ॥ सचक्रं धेहि ॥ काले तु सहपूर्वाह्णं ॥ ८१ ॥ वोपसर्जनस्य ॥ सहस्य सः ॥ सपुत्रः सहपुत्रः
८२ ॥ प्रकृत्याशिषि ॥ सहशब्दः ॥ स्वस्ति राज्ञे सह पुत्राय सहामात्याय ॥ आगोवत्सहलेष्विति वाच्यं ॥ सगवे ॥ सवत्साय सह
लाय ॥ ८३ ॥ समानस्य छंदस्यमूर्द्धप्रभृत्युदर्केषु ॥ उत्तरपदे ॥ अनुभ्राता सगर्भ्यो ऽनुसखा सयूथ्यः ॥ नेह ॥ समानमूर्द्धा
समानप्रभृतयः ॥ समानोदर्कः ॥ समानस्येति योगविभागात्सपक्षः साधर्म्यं सजातीय इत्यादिसिद्धं ॥ ८४ ॥ ज्योतिर्जनपद
रात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु ॥ समानस्य सः ॥ सज्योतिरित्यादि ॥ ८५ ॥ चरणे ब्रह्मचारिणि ॥ समानस्य

राम:
॥ २५ ॥

सः ॥ सब्रह्मचारी ॥ ८६ ॥ तीर्थे ये समानस्य सः ॥ सतीर्थ्यः ॥ ८७ ॥ विभाषोदरे ये समानस्य सः ॥ सोदर्यः ॥ समानोदर्यः ॥ ८८
दृग्दृशवतुषु ॥ समानस्य सः ॥ सदृक् ॥ सदृशः ॥ ८९ ॥ इदंकिमोरीश्की ॥ दृग्दृशवतुषु ॥ ईदृक् ॥ ईदृशः ॥ इयान् ॥ कीदृ
क् ॥ कीदृशः ॥ कियान् ॥ ९० ॥ आ सर्वनाम्नः ॥ दृग्दृशवतुषु ॥ तादृक् ॥ तादृशः ॥ तावान् ॥ एवं यादृक् ॥ दृग्दृशवतुषु यदुक्तं तदृक्षे
चेति वक्तव्यं ॥ सदृक्षः ॥ ईदृक्षः ॥ कीदृक्षः तादृक्षः ॥ ९१ ॥ समः समिरंचतावप्रत्यये ॥ सम्यङ् ॥ सम्यंचौ ॥ ९२ ॥ विष्वग्देवयोश्च
टेरद्रिः ॥ अंचतावप्रत्यये ॥ विष्वगंचति विष्वद्र्यङ् ॥ देवद्र्यङ् ॥ चात्सर्वनाम्नः ॥ तद्र्यङ् ॥ यद्र्यङ् ॥ अत्र वृत्तौ विष्वग्देवयोश्च टेर
द्र्यंचतावप्रत्यये ॥ समः समिरिति पाठः ॥ ९३ ॥ तिरसस्तिर्यलोपे ॥ अंचतावप्रत्यये तिर्यङ् ॥ तिर्यंचौ ॥ अलोपे तु तिरश्चः
तिरश्चा ॥ ९४ ॥ सहस्य सध्रिः ॥ अंचतावप्रत्यये ॥ सध्र्यङ् ॥ सध्र्यंचौ ॥ सधमादस्थयोश्छंदसि उत्तरपदयोः सहस्य ॥ सध
मादो द्युम्निनीः ॥ एतत् सधस्थः ॥ ९६ ॥ द्व्यंतरुपसर्गेभ्योप ईत् ॥ द्वीपं ॥ अंतरीपं ॥ प्रतीपं ॥ ९७ ॥ ऊदनोर्देशे ॥ अपः ॥ अनू
पो देशः ॥ कुसुपुभ्यश्च ॥ कूपः ॥ सूपः ॥ सपः ॥ ९८ ॥ अपष्ठ्या तृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकार

26 कारागछेषु ॥ उत्तरपदेषु ॥ अन्याआशीः ॥ अन्यदाशीः ॥ अन्यदाशा ॥ अन्यदास्था ॥ अन्यदास्थितः ॥ अन्यदुत्सुकः ॥ अन्य
दूतिः ॥ अन्यत्कारकः ॥ अन्यद्रागः ॥ अन्यदीयः ॥ षष्ठीतृतीयास्थयोस्तु ॥ अन्यस्याशीरन्याशीः ॥ अन्येनास्थितो
न्यास्थितः ॥ ९९ ॥ अन्यस्य दुक् ॥ अन्यदर्थः ॥ अन्यार्थः ॥ १०० ॥ कोः कत्तत्पुरुषेचि ॥ उत्तरपदे ॥ कदश्वः ॥ कदुष्ट्रः ॥
कदन्नं ॥ १०१ ॥ रथवदयोश्च कोः कत्तत्पुरुषे ॥ कद्रथः ॥ कद्वदः ॥ १०२ ॥ तृणे च जातौ ॥ कोः कत् ॥ कत्तृणं नाम जातिः ॥ अ
न्यत्र कुतृणं ॥ १०३ ॥ कापथ्यक्षयोः ॥ कोः ॥ कापथः ॥ काक्षः ॥ १०४ ॥ ईषदर्थे ॥ कोः कातिक्तं ॥ काम धुरं ॥ १०५ ॥ विभाषा पुरुषे
कोः का ॥ कापुरुषः ॥ कुपुरुषः ॥ १०६ ॥ कवं चोष्णे ॥ कोर्विभाषा ॥ चाद्विभाषा का ॥ कवोष्णं ॥ कोष्णं ॥ कदुष्णं ॥ १०७ ॥ पथि च छंद
सि ॥ कोः कव का इत्येतावादेशौ विभाषा ॥ कवपथः ॥ कापथः ॥ कत्पथः ॥ १०८ ॥ पृषोदरादीनि यथोपदिष्टं ॥ तथा साधु
पृषत् उदरं पृषोदरं ॥ वारिवाहको बलाहकः ॥ आकृतिगणोयं ॥ भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ॥ गूढोत्मा वर्णविकृ राम॰
तेर्वर्णनाशात्पृषोदरं ॥ १०९ ॥ संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ॥ द्व्यह्नि ॥ द्व्यहनि ॥ द्व्यह्ने ॥ व्यह्नि व्यहनि व्य ॥२६॥

ह्ने ॥ साम्नान्हि· सायाहनि· सायान्हे ॥ ढ्लोपे पूर्वस्य दीर्घोऽणः ॥ पुनारमते ॥ हरीरम्यः ॥ शंभूराजते ॥ १११ ॥ सहिवहोरोद्‌वर्ण
स्य ॥ ढ्लोपे ॥ सोढारौ ॥ वोढा ॥ वोढारौ ॥ ११२ ॥ साढ्यै साढ्वा साढेति निगमे ॥ निपात्यते ॥ ११३ ॥ संहितायां ॥ अधिकारसूत्रं ॥ ११४
कर्णे लक्षणस्याविष्टाष्टपंचकर्ण ॥ भिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य ॥ उत्तरपदे दीर्घः ॥ दात्राकर्णः ॥ द्विगुणाकर्णः ॥ अ
विष्टादीनां किं ॥ विष्टकर्णः ॥ अष्टकर्णः ॥ इत्यादि ॥ ११५ ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ उत्तरपदे पूर्वस्य दीर्घः ॥ सं
हितायां ॥ उपानत् ॥ नीवृत् ॥ प्रावृत् ॥ मर्मावित् ॥ नीरुक् ॥ ऋतीषट् ॥ परीतत् ॥ ११६ ॥ वनगिर्योः संज्ञायां कोटरकिंशुलुका
दीनां ॥ उत्तरपदयोर्दीर्घः ॥ वने कोटरादीनां ॥ कोटरावणं ॥ मिश्रकावणं ॥ कोटर मिश्रक ॥ सिध्रक ॥ पुरग ॥ शारिक ॥ गिरौ किंशु
लुकादीनां ॥ किंशुलुकागिरिः ॥ अंजनागिरिः ॥ किंशुलुक ॥ अंजन ॥ भंजन ॥ लोहित ॥ कुक्कुट ॥ नड ॥ शाल्व ॥ ११७ ॥ वले पूर्वस्य
दीर्घः ॥ कृषीवलः ॥ दंतावलः ॥ ११८ ॥ मतौ बह्वचोऽनजिरादीनां ॥ दीर्घः पुष्करावती ॥ वीरणावती ॥ अजिरादीनां तु ॥ अजिरव
ती ॥ खदिरवती ॥ अजिर खदिर ॥ पुलिन हंस ॥ कारंडव चक्रवाक ॥ ११९ ॥ शरादीनां च ॥ मतौ दीर्घः ॥ शरावती ॥ वंशावती ॥ शर

५७

वंश ॥ ध्रम ॥ अहि ॥ कपि ॥ मणि ॥ मुनि ॥ शुचि ॥ हनु ॥ १२० ॥ इकोवहेऽपीलोः ॥ उत्तरपदे दीर्घः ॥ ऋषीवहं ॥ कपीवहं ॥ १२१ ॥ उपसर्गस्य
घञ्यमनुष्ये बहुलं ॥ उत्तरपदे दीर्घः ॥ अपामार्गः ॥ सादकारयोः कृत्रिमे ॥ प्रासादः ॥ प्राकारः ॥ मनुष्ये तु निषादः ॥ १२२ ॥ इकः का
शे ॥ उपसर्गस्य उत्तरपदे दीर्घः ॥ नीकाशः ॥ अनूकाशः ॥ १२३ ॥ दस्ति ॥ दा इत्यस्य स्थाने यस्तकारादिरादेश स्तस्मिन्निगंतस्योप
सर्गस्य दीर्घः ॥ परीत्तं ॥ नीत्तं ॥ १२४ ॥ अष्टनः संज्ञायां ॥ उत्तरपदे दीर्घः ॥ अष्टापदं ॥ अष्टावक्रः ॥ १२५ ॥ छंदसि च ॥ अष्टन
उत्तरपदे दीर्घः ॥ अष्टापदी नवपदी वसूरवुषी ॥ आग्नेयोष्टाकपालो भवति ॥ १२६ ॥ चितेः कपि दीर्घः ॥ एकचितीकः ॥ द्विची
तीकः ॥ १२७ ॥ विश्वस्य वसुराटोः ॥ उत्तरपदयोर्दीर्घः ॥ विश्वाराट् ॥ १२८ ॥ नरे संज्ञायां ॥ विश्वस्य दीर्घः ॥ विश्वानरः ॥ १२९ ॥
मित्रे चर्षौ ॥ विश्वस्य दीर्घः ॥ विश्वामित्र ऋषिः ॥ १३० ॥ मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ ॥ दीर्घः ॥ सोमावती ॥ अश्वाव
ती ॥ इंद्रियावती ॥ विश्वदेव्यावती ॥ १३१ ॥ ओषधेश्च विभक्तावप्रथमायां ॥ दीर्घः ॥ नमः पृथिव्यै ॥ नम ओषधीभ्यः ॥ १३२ ॥
ऋचि तुनघमक्षुतङ्कुत्रोरुष्याणां ॥ दीर्घः ॥ तु ॥ आतू न इंद्र वृत्रहन् ॥ नु ॥ नूमर्तः ॥ घ उत वा घा स्यालात् मक्षू

राम. ॥ २६ ॥

मक्ष्व हिष्मामजज्ञ ततङि॰ ति थादेशस्य ङि॰ त्वपक्षे ग्रहणं ॥ भूरता जातवेदसं ॥ इह नुन ॥ शृणोत ग्रावाणः ॥ कुः ॥ ह्रुम
नाः ॥ त्र ॥ अत्र्यातो रूपं ॥ उरुष्य ॥ उरुष्याणो अघायतः ॥ १३३ इकः सुञि ॥ दीर्घो मंत्रे ॥ सुञिति निपातः ॥ अ
भीषुणः सखीनां ॥ ऊर्ध्व ऊषुणः ॥ १३४ द्व्यचोऽतस्तिङः ॥ मंत्रे दीर्घः ॥ विद्मा हि त्वा सत्पतिं शूर गोनां ॥ द्व्यचः
किं ॥ अश्वा भवता वाजिनः ॥ अतः किं ॥ आदेवान्वक्षि यक्षि च ॥ १३५ निपातस्य च ॥ मंत्रे दीर्घः ॥ एवा ते सूनृतांत
स्य ॥ अघा ते वातारिषः ॥ अथा वयमादित्य ॥ १३६ अन्येषामपि दृश्यते ॥ दीर्घः ॥ शिष्टप्रयोगादयमनुगंतव्यः
केशाकेशि ॥ वाहवाहवि ॥ नुराषाट् ॥ श्वापदः ॥ इत्यादि ॥ १३७ चौ ॥ पूर्वस्य दीर्घः ॥ चु इति लुप्ताकारस्यांचतेरनुकर
णं ॥ दधीचः ॥ प्राचः ॥ प्रतीचः ॥ १३८ संप्रसारणस्य ॥ उत्तरपदे दीर्घः ॥ कारीषगंधीपुत्रः ॥ कारीषगंधीपतिः ॥ १३९
इति पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहे पादस्तृतीयोध्यायस्य षष्ठस्यायं समर्थितः ॥ अंगस्य ॥ अधिकारसू
त्रं ॥ १ हलः ॥ अंगावयवाद्धलः परं यत्संप्रसारणं तदंतांगस्य दीर्घः स्यात् ॥ ज्या जीनः ॥ श्वि शूनः ॥ २ नामि ॥ अजं

तांगस्यदीर्घः॥ वृक्षाणां॥ अग्नीनां॥ वायूनां॥ पितॄणां॥ ३॥ नतिसृचतसृ॥ एतयोर्नामिदीर्घः॥ तिसृणां चतसृणां
४॥ छंदस्युभयथा॥ दीर्घनिषेधावित्यर्थः॥ धातृधातॄणामितिवह्वृचाः॥ ह्रस्वपाठस्तैत्तरीयाणां॥ ५॥ नृचानाम्यु
भयथा॥ नृणां॥ नॄणां॥ ६॥ नोपधायाः॥ नांगस्यदीर्घोनामि॥ पंचानां॥ सप्तानां॥ ७॥ सर्वनामस्थानेचासंबु
द्धौ॥ नांतांगस्योपधायादीर्घः॥ राजा॥ राजानौ राजानः॥ राजानं॥ राजानौ॥ कुंडानि वनानि॥ ८॥ वासम्पूर्वस्य
निगमे॥ सर्वनामस्थानेचासंबुद्धौनोपधायादीर्घः॥ ऋभुक्षाणं ऋभुक्षणं॥ ९॥ सांतमहतः संयोगस्य॥ नो
पधायादीर्घोऽसंबुद्धौसर्वनामस्थाने॥ विद्वान् विद्वांसौ विद्वांसः विद्वांसं विद्वांसौ॥ महतेः खल्वपि महा
न्॥ महांतौ॥ महांतः॥ महांतं॥ महांतौ॥ १०॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां॥ उप
धादीर्घोऽसंबुद्धौसर्वनामस्थाने॥ आपः॥ तृन्॥ कर्त्ता कटान्॥ तृच्॥ कर्त्ताकटस्य॥ स्वसा॥ स्वसारौ॥ स्वसारः॥ स्वसा
रं॥ स्वसारौ॥ एवंनप्ता॥ नप्तारावित्यादि॥ ११॥ इन्हन्पूषार्यम्णांशौ॥ उपधादीर्घः॥ बहुदंडीनि बहुवृत्रहा

णि॥ बहुपूषाणि॥ बहुर्यमाणि॥ सिद्धे सत्यारंभो नियमार्थः॥ शावेवेति॥ तेनेह न॥ दंडिनौ वृत्रहणौ॥ पूषणौ॥ अर्य
मणौ॥ १२॥ सौ च॥ इन्हन्पूषार्यम्णामुपधाया दीर्घोऽसंबुद्धौ॥ दंडी॥ वृत्रहा॥ पूषा॥ अर्यमा॥ १३॥ अत्वसंतस्य चा
धातोः॥ उपधाया दीर्घोऽसंबुद्धौ सौ॥ अत्वंतस्य॥ गोमान्॥ कृतवान्॥ असंतस्य सुपयाः॥ सुस्रोताः॥ सुयशाः॥ १४॥ अनुनासि
कस्य क्विझलोः क्ङिति॥ अंगस्योपधाया दीर्घः॥ प्रशान्॥ प्रतान्॥ झलि शांतः॥ शांति॥ झलि ङिति॥ शशांतः॥ तंतांतः
१५॥ अज्झनगमां सनि॥ अंगानां दीर्घः॥ चिचीषति॥ तुष्टूषति॥ चिकीर्षति॥ हनः॥ जिघांसति॥ गमेरिङादेशस्य ग्रह
णं॥ अधिजिगांसते॥ १६॥ तनोतेर्विभाषा॥ अंगस्य झलि सनि दीर्घः॥ तितांसति॥ तितंसति॥ १७॥ क्रमश्च क्त्वि॥ झलि उ
पधाया विभाषा दीर्घः॥ क्रांत्वा॥ क्रंत्वा॥ १८॥ च्छ्वोः शूडनुनासिके च॥ चात् क्वौ झलि क्ङिति॥ च्छ इति सतुक्कनिर्देशः॥
प्रच्छ॥ प्रश्नः॥ विच्छ॥ प्रश्नः॥ वस्य ऊठ्॥ सिवेर्नः॥ स्योनः॥ क्वौ छस्य॥ शब्दप्राट्॥ वस्य॥ अक्षद्यूः॥ झलादौ क्ङि
ति॥ द्यूः॥ द्यूतवान्॥ द्यूतं॥ द्यूतवान्॥ १९॥ ज्वरत्वरस्रिव्यविमवामुपधायाश्च॥ चाद्वस्य ऊठ् क्वौ झलि क्ङिति॥ ज्वरः॥ जूः

29 जुरः ॥ जूर्णः ॥ जूर्णवान् ॥ जूर्तिः ॥ एवं त्सरः ॥ त्सरः ॥ जः मरः ॥ २० ॥ राल्लोपः ॥ छ्वोः ॥ क्वौ झलि क्ङिति ॥ मूर्छो ॥ मूः ॥ मूर्त्तः ॥ मूर्तिः
तुर्वी ॥ तूः ॥ तूः ॥ तूर्णः ॥ तूर्त्तिः ॥ धुर्वी ॥ धूः ॥ २१ ॥ असिद्धवदत्राभात् ॥ यदित ऊर्द्ध्वमनुक्रमिष्यामो भसंशब्दनात् तत्का
दसिद्धवद्भवतीति वेदितव्यं ॥ अत्रेति समानाश्रयत्वप्रतिपत्त्यर्थं ॥ व्याश्रये कार्ये तु कर्त्तव्ये नासिद्धं भवतीत्यर्थः
एधि ॥ शाधि ॥ अत्र एत्वशाभावयोः कृतयोः झल्लक्षणं धित्वं न प्राप्ति असिद्धत्वाद्भवति ॥ २२ ॥ श्नान्नलोपः ॥ अंजः ॥
अनक्ति ॥ भंजो ॥ भनक्ति ॥ २३ ॥ अनिदितां हल उपधायाः क्ङिति ॥ हलंतानामनिदितां नलोपः ॥ स्रंसु ॥ स्रस्तः ॥ ध्वंसु ॥ ध्वस्तः
ङिति ॥ सनीस्रस्यते ॥ दनीध्वस्यते ॥ इदितां तु ॥ नदि ॥ नंद्यते ॥ २४ ॥ दंशसंजस्वंजां शपि ॥ दशति ॥ सजति ॥ परिष्वजते ॥ २५
रंजेश्च ॥ शपि नलोपः ॥ रजति ॥ २६ ॥ घञि च भावकरणयोः ॥ रंजेर्नलोपः ॥ भावे ॥ विचित्रो रागः ॥ करणे ॥ रज्यतेऽनेन रागः ॥ २७
स्यदो जवे ॥ स्यंदेर्घञि निपात्यते ॥ २८ ॥ अवोदैधौद्मप्रश्रथहिमश्रथाः ॥ निपात्यंते ॥ २९ ॥ नांचेः पूजायां ॥ नलोपः अं
चिताह्यस्य गुरवः ॥ नेह ॥ उदकमुदंकं कूपात् उद्धृतमित्यर्थः ॥ ३० ॥ क्त्वि स्कंदिस्यंदोः ॥ नलोपो न ॥ स्कंत्वा ॥ स्यंत्वा ॥ ३१ ॥ जांतन ॥ राम॰ २९ ॥

शंविभाषा॥त्क्विनलोपः॥रक्त्वा॥रंक्त्वा·भक्त्वा·॥भंक्त्वा॥नश॥नष्ट्वा·नंष्ट्वा·॥३२॥भंजेश्च चिणि·विभाषानलोपः॥अभाजि॥अ
भंजि॥३३॥शासइदङ्हलोः॥उपधायाः क्ङिति॥ अन्वशिषत॥अन्वशिषतां॥हलि क्ङिति॥ शिष्टः॥शिष्टवान्॥तौ शिष्टः
आवां शिष्वः॥३४॥शाहौ॥शासः॥अनुशाधि॥ ३५॥हंतेर्जः॥हौ जहि शब्दरूप॥३६॥अनुदात्तोपदेशवनति॥ तनोत्यादीना
मनुनासिकलोपो झलि क्ङिति·॥हन·हतो देवदत्तः॥तौ हतः॥हानिगमियमिरमिनमिमन्यतयोऽनुदात्तोपदेशाः॥वनतेः
वतिः॥तनोत्यादीनां॥तनः॥क्षतः॥अततः·अक्षतः॥३७॥वाल्यपि॥अनुनासिकलोपः॥नि—त्य नि—म्य॥विसमत्य
विसमन्यः॥३८॥नक्तिचिदीर्घश्च॥अनुनासिकलोपः॥हंतिः॥वंतिः॥तंतिः॥३९॥गमः क्वौ॥अनुनासिकलोपः॥जगत्॥४०॥
विड्वनोरनुनासिकस्यात्॥अब्जाः॥गोजाः॥पुरोगाः॥वनिपि॥विजावा॥अग्रेगावा॥४१॥जनसनखनांसञ्झलोः॥आत्क्ङि
ति॥सिषासति॥झलि·जातः॥सातः॥खातः॥४२॥येविभाषा॥ जनसनखनामात्क्ङिति·॥जायात्॥सायात्॥खायात्॥पक्षे ज
न्यादित्यादि॥४३॥तनोतेर्यकि·तायते·तन्यते·॥४४॥सनः क्तिचि लोपश्चास्यान्यतरस्यां॥चादात्॥सातिः॥सतिः॥संतिः॥४५॥

30 आर्द्धधातुके॥ अयमधिकारो न ल्यपीतियावत्॥४६॥ भ्रस्जो रोपधयोरमन्यतरस्यां॥ आर्द्धधातुके स्थानषष्ठीनिर्देशाद्रोपध
योर्निवृत्तिः॥ मित्त्वादन्त्यादचः परः॥ बभर्ज॥ बभर्जतुः॥ रमभावे॥ बभ्रज्जः॥ बभ्रज्जतुः॥४७॥ अतो लोपः॥ आर्द्धधा
तुके॥ अचिकीर्षकः॥४८॥ यस्य हलः॥ लोपः आर्द्धधातुके॥ यस्येति संघातग्रहणं॥ बेभिदिता॥ कुषुभिता॥४९॥
क्यस्य विभाषा॥ हलउत्तरस्य॥ क्यस्येति॥ क्यच्क्यङोर्ग्रहणं॥ समिधिता॥ समिध्यिता॥ क्यङः॥ [illegible] दृसिता॥ विदृसि
ता॥५०॥ णेरनिटि॥ लोपः॥ अबीभवत्॥ भावना॥५१॥ निष्ठायां सेटि॥ णेर्लोपः॥ भावितः॥ भावितवान्॥५२॥ जनिता मंत्रे॥ इ
डादौ तृचि णिलोपो निपात्यते॥ योनः पिता जनिता॥५३॥ शमिता यज्ञे॥ निपात्यते॥ शमयितेत्यर्थः॥५४॥ अयामं
तान्त्वाय्येत्विष्णुषु॥ णेः॥ लोपापवादः॥ आमि॥ भावयांचक्रे॥ अंत॥ भावयंतः॥ आलु॥ स्पृहयालुः॥ आय्य॥ स्पृह
याय्यः॥ इत्नु॥ स्तनयित्नुः॥ इष्णु॥ वीरुधः पारयिष्णवः॥५५॥ ल्यपि लघुपूर्वात्॥ णेरयः॥ विगणय्य नयंति पौरुषं॥५६॥
विभाषापः॥ णेरयो ल्यपि॥ अप्याप्य॥ अप्याप्य॥५७॥ युप्लुवोर्दीर्घश्छंदसि॥ ल्यपि॥ यथादांत्यनुपूर्वं वियूय छं० राम॰
परिप्लूय॥५८॥ क्षियः॥ दीर्घो ल्यपि॥ प्रक्षीय॥५९॥ निष्ठायामण्यदर्थे क्षियो दीर्घः॥ ण्यदर्थो भावकर्मणी॥ क्षीणः॥ ॥३०॥

क्षीणवान् ॥ ६० ॥ वाक्रोशदैन्ययोः ॥ क्षीणायुर्भव । क्षितायुर्वा । दैन्ये । क्षीणस्तपस्वी । क्षितो वा । ६१ ॥ स्यसिच्सीयु
ट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ उपदेशेऽजंतानां ॥ भाविष्यते ॥ अभाविष्यत
सिचि ॥ अभाविषातां ॥ सीयुटि । भाविषीष्ट । तासि । भाविता । पक्षे । भविष्यते इत्यादि । कर्मणि अनुभावि
ष्यते । हनः ॥ घानिष्यते ॥ अघानिषातां ॥ घानिषीष्ट । घानिता । पक्षे । हनिष्यते ॥ अहसातां । वधिषी
ष्ट । हंता । ग्रहः ॥ ग्राहिष्यते ॥ अग्राहिषातां । ग्राहिषीष्ट । ग्राहिता । पक्षे । ग्रहीष्यते । अग्रहीषातां । ग्रहीषी
ष्ट । ग्रहीता । दृश ॥ दर्शिष्यते ॥ अदर्शिषातां । दर्शिषीष्ट । दर्शिता । पक्षे । द्रक्ष्यते । अदृक्षातां ॥ दृक्षीष्ट । द्रष्टा
६२ ॥ दीङो युट् चिण्क्ङिति । द्वितीये ॥ ६३ ॥ आतो लोप इटि च । चाराद्धातुकेऽ चिण्क्ङिति । इटि । पपिथ । अचि
क्ङिति ॥ पपतुः ॥ पपुः ॥ अचि क्ङिति ॥ प्रदा । प्रधा । ६४ ॥ ई घ्रति । आतः गुणः ॥ देयं । धेयं ॥ ६५ ॥ घुमास्थागापा
जहातिसां हलि ॥ आत ई त्क्ङिति । दीयते ॥ धीयते ॥ मीयते ॥ स्थीयते ॥ गीयते ॥ पीयते ॥ हीयते ॥ अवसीयते ॥ इ

31

सिखस्त्वपि॥ देदीयते। देधीयते॥ मेमीयते॥ तेष्टीयते॥ जेगीयते॥ पेपीयते॥ जेहीयते॥ अवसेसीयते॥ ६६॥ एर्लिङि। घुमास्थागापा
जहातिसामानः क्ङिति। देयात्॥ दे[illegible]यात्॥ देयास्तां॥ एवं धेयादित्यादि। ॥ ६७॥ वान्यस्यसंयोगादेः॥ आत एः क्ङिति लिङि।
अन्यस्येति घुमास्थादेरन्यस्येत्यर्थः॥ ग्लेयात्॥ ग्लायात्॥ म्लेयात्॥ म्लायात्॥ ईच॥ नल्यपि। आत ईत्॥ प्रदाय
प्रधाय॥ ६९॥ मयतेरिदन्यतरस्यां॥ ल्य[illegible]प्यातः॥ अपमित्य॥ अपमाय॥ ७०॥ लुङ्। लङ्। लृङ्। क्ष्वडुदात्तः॥ अंग
स्य॥ अभ्वत्॥ अभवत्॥ अभाविष्यत्॥ ७१॥ आडजादीनां॥ अंगानां लुङ्। लङ्। लृङ्। क्ष्वदात्तः॥ ऐक्षिष्ट॥ ऐक्षत॥ ऐ
क्षिष्यत्॥ ७२॥ छंदस्यपि दृश्यते॥ आडनजादीनां॥ आनट्॥ सुरुचो वेन आवः॥ ७३॥ नमाङ्योगे॥ अडाटौ॥ माभव
द्दित्यादि॥ ७४॥ बहुलं छंदस्यमाङ्योगेपि॥ अडाटौ॥ जनिष्टा उग्रः॥ मावः क्षेत्रे परवीजान्यवाप्सुः॥ ७५॥ इरयो
रे॥ छंदसि॥ प्रथमं दध्र आपः॥ रेभावस्याभीयासिद्धत्वादातो लोपः॥ अत्र रेशब्दस्य टिकृते पुनरपि रेभावस्त
दर्थमेव स्वस्त्रेइरयोरिति द्विवचनांतं निर्दिष्टं॥ ७६॥ अचिश्नुधातुभ्रुवां य्वोरियङुवङौ। प्रत्यये। श्नु। आप्नु

राम॰
॥ ३१॥

वंति ॥ शश्रुवंति ॥ धातोरिकारांतस्य ॥ चेक्रियः ॥ चेक्षियः ॥ धातोरुकारांतस्य ॥ लोलुवः ॥ पोपुवः ॥ सुस्रुवः भ्रूः ॥ बोभ्रुवौ
भ्रुवः ॥ ७७ ॥ अभ्यासस्यासवर्णे ॥ य्वोरियङुवङौ वचि । इयेष । उवोष ॥ ७८ ॥ स्त्रियाः ॥ इयङ् जादौ प्रत्यये । स्त्रि
यौ ॥ स्त्रियः ॥ ७९ ॥ वाम्शसोः ॥ स्त्रिया इयङ् ॥ स्त्रियं ॥ स्त्रीं ॥ स्त्रियः ॥ स्त्रीः ॥ ८० ॥ इणो यण् ॥ अचि प्रत्यये । यंति
इतः ॥ यंति । ८१ ॥ एरनेकाचोसंयोगपूर्वस्य ॥ धातोरचि प्रत्यये । निन्यतुः ॥ निन्युः ॥ ८२ ॥ ओः सुपि । धातोरसंयोग
पूर्वस्यानेकाचो यण् अचि । खलप्वौ । खलप्वः ॥ ८३ ॥ वर्षाभ्वश्च ओः सुप्यचि यण् ॥ वर्षाभ्वौ वर्षाभ्वः ॥ ८४ ॥ नभ्र
सुधियोः ॥ सुप्यचि यण् ॥ स्वयंभुवौ । सुधियौ ॥ ८५ ॥ छंदस्युभयथा ॥ भ्र सुधियोर्यण् इयङुवङौ च ॥ वनेषु चि
त्रं विभ्वं ॥ विभुवं वा ॥ सुध्योहव्यमग्ने ॥ सुधियो वा ॥ ८६ ॥ हुश्रुवोः सार्वधातुके अनेकाचोंगस्यासंयोगपूर्वस्योव
र्णस्य यण् अचि । जुह्वति ॥ जुह्वतुः ॥ सुन्वंति ॥ शृण्वंति ॥ ८७ ॥ भुवो वुग्लुङ्लिटोः ॥ अचि । अभूवन् ॥ अभूवं ॥ लिटि ब
भूव ॥ बभूवतुः बभूवतुः ॥ ८८ ॥ ऊदुपधाया गोहः ॥ अचि प्रत्यये णौ ह इति कृतगुणस्यानुकरणं ॥ गूहनीयाहिं । नेह

32

जुगुहतुः ॥ ९ दोषो णौ ॥ ऊदुपधायाः ॥ दूषयति ॥ १० ॥ वा चित्तविरागे ॥ दोष उपधाया णावूत् ॥ दूषयति दोषयति वा का
मश्चित्तं ॥ ११ मितां ह्रस्वः ॥ णावुपधायाः ॥ घटादयो मितः ॥ घटयति ॥ व्यथयति ॥ १२ चिण्णमुलोर्दीर्घोऽन्यतर
स्यां ॥ णावुपधाया मितां ॥ अशामि । अशमि । शामं । शामं शमं शमं ॥ १३ खचि ह्रस्वः णावुपधायाः ॥ द्विषंतपः परंत
पः ॥ १४ ॥ ह्लादो निष्ठायां ॥ णावु पधाया ह्रस्वः ॥ प्रह्लन्नः ॥ प्रह्लन्नवान् ॥ १५ ॥ छादेर्घेऽद्व्युपसर्गस्य ॥ उपधाया ह्रस्वः
उरश्छदः ॥ दंतछदः । प्रछदः ॥ अद्व्युपसर्गस्य किं ॥ समुपछादः ॥ १६ ॥ इस्मन्त्रन्क्विषु च ॥ छादेरुपधाया ह्रस्वः
छद्म ॥ छदिः ॥ मन ॥ छद्मः । त्र । छत्रं । क्वि । तनुछत् ॥ १७ ॥ गमहनजनखनघसां लोपः क्ङित्यनङि । अच्युपधायाः
क्ङिति । ॥ जग्मतुः ॥ जग्मुः ॥ जघ्नतुः ॥ जघ्नुः ॥ जज्ञतुः ॥ जज्ञुः ॥ चख्नतुः ॥ चख्नुः ॥ जक्षतुः ॥ जक्षुः ॥ ङि । ति ॥ ओषधीः
समगमत ॥ घ्नंति ॥ अघ्नन् ॥ जज्ञे । जज्ञाते ॥ अखनन् ॥ अक्षन्नमीमदंतः ॥ १८ तनिपत्योश्छंदसि ॥ उपधाया लो
पः क्ङिति ॥ वितत्निरे यज्ञं ॥ शकुना इव पप्तिम ॥ १९ ॥ घसिभसोर्हलि च ॥ उपधालोपः क्ङिति । सग्धिश्च मे । बब्धां ते

राम॰
॥ ३२ ॥

हरीधानाः॥१०॥हुझल्भ्यो हेर्धिः॥जहुधि॰ हल्भ्यः॥अद्धि॰ छिंधि॰ भिंधि॰॥१॰१॥श्रुशृणुपृकृवृभ्यश्छंदसि
हेर्धिः॥श्रुधीहवं॥शृणुधीगिरः॥रायस्पूर्द्धि॰॥उरुणस्कृधि॰ अपावृधि॥१॰२॥अद्धि॰ ततश्च॥हेर्द्धिः॥अस्मेप्रयं
धि॰॥यमेः शपोलुक्॥वाच्छंदसीतिपक्षेपितान्ङि॰ त्वंन॥१॰३॥चिणोलुक्प्रत्ययस्य॥अकारि॥अपाचि॥१॰४॥
अतोहेः॥लुक्॥भव॰ पच॥१॰५॥उतश्चप्रत्ययादसंयोगपूर्वात॰ हेर्लुक्॰ सुनु॰ कुरु॥१॰६॥लोपश्चास्यान्यतरस्यां
म्वोः॥असंयोगपूर्वः प्रत्ययोकारस्तस्य॥सुन्वः॥सुनुवः सुन्मः॥सुनुमः॥१॰७॥नित्यंकरोतेः॥उ
तोलोपोम्वोः॥कुर्वः॥कुर्मः॥१॰८॥ये च॥करोतेरुतोलोपः कुर्यात॥१॰९॥अतउत्सार्वधातुकेउप्रत्ययांतकरो
तेरतउतक्ङिति॥कुरुतात॥कुरुतां॥११०॥श्नसोरल्लोपः॥सार्वधातुके क्ङिति॰ रुन्धः॥रुन्धंति॥स्तः॥सं॥१११॥
श्नाभ्यस्तयोरातः॥लोपः सार्वधातुके क्ङिति॥क्रीणंति॥अभ्यस्तस्य॥मिमते जिहते॥११२॥ई हल्यघोः
श्नाभ्यस्तयोरातः॥सार्वधातुके क्ङिति॥क्रीणीते॥मिमीते॥११३॥इ हूरि ह्रस्वः॥हलि क्ङिति सार्वधातुके हरि

33 ङ्क्तिसौ ॥११४॥ भियोऽन्यतरस्यां ॥ इद्धलि क्ङिति सार्वधातुके ॥ बिभितः । बिभीतः ॥११५॥ जहातेश्च ॥ इद्धलि क्ङिति सा
र्वधातुकेऽन्यतरस्यां । जहितः । जहीतः ॥११६॥ आ च हौ ॥ जहातेश्चाद्दीतौ · जहाहि · जहिहि · जहीहि ॥११७॥ लो
लोपि ॥ जहातेरातः सार्वधातुके · जह्यात् ॥११८॥ घ्वसोरेद्धावभ्यासलोपश्च ॥ देहि ॥ धेहि ॥ एधि ॥११९॥ अत ए
कहल्मध्येऽनादेशादेर्लिटि ॥ एदभ्यासलोपश्च क्किति ॥ पेचतुः ॥ पेचुः ॥ अतः किं ॥ दिदिवतुः । एकहल्मध्ये किं त
त्सरतुः अनादेशादेः किं ॥ चकणतुः ॥१२०॥ थलि च सेटि ॥ प्रागुक्तं पेचिथः शेकिथः ॥१२१॥ तॄफलभजत्रपश्च
अत एदभ्यासलोपश्च क्किति लिटि सेटि थलि च ॥ तेरतुः ॥ तेरिथ · फेलतुः । फेलिथ · भेजतुः । भेजिथ ॥ त्रेपे ॥ त्रेपाते
॥१२२॥ राधो हिंसायां ॥ अत एदभ्यासलोपश्च क्किति लिटि सेटि थलि च ॥ अपरेधतुः ॥ अपरेधिथ ॥१२३॥ वा जॄभ्रमुत्र
सां ॥ एत्वाभ्यासलोपौ क्किति लिटि सेटि थलि च ॥ जेरतुः । जजरतुः ॥ भ्रेमतुः ॥ बभ्रमतुः ॥ त्रेसतुः ॥ तत्रसतुः ॥१२४॥ फ
णां च सप्तानां । एत्वाभ्यासलोपौ क्किति लिटि सेटि थलि च [illegible] फेणतुः ॥ पफणतुः ॥ फणादयः राम· ॥३३॥
णी

स्वनन्त्यंताः सस्रम्वादिषु ॥१२५॥ न शसददवादिगुणानां ॥ एत्वाभ्यासलोपौ· शसतुः ॥ ददतुः । ववदतुः ॥ गुणशब्देन भाविनोऽकारेगु·
णस्तस्य· शशरतुः ॥१२६॥ अर्वणस्त्रसावनञः ॥ अर्वंतौ· ॥ अर्वंतः ॥ अर्वंतं· । अर्वद्भ्यामित्यादि ॥१२७॥ मघवाबहुलं ॥ त्रश
ब्दांतः प्रयोज्यः ॥ मघवान् ॥ मघवंतौ ॥ पक्षे· मघवा· मघवानौ ॥१२८॥ भस्य· अधिकार आध्यायपरिसमाप्तेः ॥१२९॥
पादः पत्· भस्यांगस्य· सुपदः ॥ सुपदा· भस्यकिं· सुपाद्भ्यां ॥१३०॥ वसोः संप्रसारणं· भस्य· विदुषः ॥ विदुषा ॥१३१॥ वाह ऊ
ट्· भस्य· पष्ठौहः पष्ठौहा ॥१३२॥ श्वयुवमघोनामतद्धिते· शुनः ॥ यूनः ॥ मघोनः ॥१३३॥ अल्लोपोनः ॥ राज्ञः ॥ रा
ज्ञा ॥१३४॥ षपूर्वहन्धृतराज्ञामणि ॥ अल्लोपोनः ॥ ताक्ष्णः ॥ भ्रौणघ्नः ॥ धार्तराज्ञः ॥१३५॥ विभाषाङिश्योः ॥ अल्लोपो
नः ॥ राज्ञि· राजनि· श्यां· साम्नी· सामनी ॥१३६॥ न संयोगाद्वमंतात् ॥ अल्लोपोनः ॥ पर्वणा ॥ ब्रह्मणा ॥१३७॥ अचः
अल्लोपः ॥ अच इति लुप्तनकारांचतिग्रह्यते ॥ प्राचः ॥ दधीचः ॥ मध्वचः ॥१३८॥ उद ईत् ॥ अचो कारस्य· उदीचः ॥ उदी
चा ॥१३९॥ आतो धातोः ॥ भस्यांगस्य· कीलालपः ॥ कीलालपा ॥१४०॥ मंत्रेष्वाङ्यादेरात्मनः ॥ लोपः· त्मनादेवेषु ॥१४१॥

34 तिविंशतेर्डिति· भस्यलोपः। विंशतेरामन्त्र्या आसन्नविंशाः॥ समासांतोडच्॥ १४२॥ टेः॥ डितिभस्यलोपः॥ अहरात्रिंशाः॥ अ
धिकचत्वारिंशाः॥ पंचषाः॥ १४३॥ नस्तद्धिते। भस्य टेर्लोपः॥ राज्ञः समीपमुपराजं· अध्यात्मं· टच्समासांतः॥ १४४॥ अह्नष्ट
खोरेव· टेर्लोपः॥ द्व्यहः॥ द्व्यहीनः। नेह· आह्निकं॥ १४५॥ ओर्गुणः॥ भस्य तद्धिते· बाभ्रव्यः॥ मांडव्यः॥ १४६॥ ढे लोपोऽक
द्रुः॥ ओस्तद्धिते· कामंडलेयः॥ कद्रोस्तका द्रवेयः॥ १४७॥ यस्येति च। भस्य लोपश्चात्तद्धिते· इश्च अश्च अंतस्य॥ ईति·। दा
क्षी· सखी· ब्राह्मणी· कुमारी· तद्धिते· आत्रेयः॥ गार्ग्यः॥ १४८॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः॥ लोप इति त
द्धिते च· सौरी बलाका॰ सौरीयः। तैषी रात्रिः॥ तैषमहः॥ आगस्ती· आगस्तीयाः॥ मत्सी॥ १४९॥ हलस्तद्धितस्य·। य उपधा
या लोप ई इति॥ गार्गी·। वात्सी· १५०॥ आपत्यस्य च तद्धितेऽनाति· हलः परस्य यस्य लोपः। गार्गकं॥ गार्गीयाः॥ आति तु गा
र्ग्यायणः॥ १५१॥ क्यच्व्योश्च॥ हल उत्तरस्यापत्यस्य यस्य लोपः॥ गार्गीयति· गार्गीयते· गार्गीभूतः॥ १५२॥ बिल्वकादि
भ्यश्छस्य लुक्। तद्धिते· बिल्वाः संति यस्यां बिल्वकीया तस्यां भवा बैल्वकाः। वैत्रकाः॥ नडादीनां कुक् चेति छसन्नियो ॥ राम· ३४॥

गोन्नकृत्तकुगागमाविन्त्वकादयः ॥ १५३ ॥ तुरिष्ठेमेयःसु लोपः ॥ अतिशये वक्ता वसिष्ठः ॥ [illegible]करिष्ठः ॥ दोहीयसी धेनुः ॥ १५४ ॥
टेः ॥ लोप इष्ठेमेयःसु ॥ पटिष्ठः ॥ पटिमा पटीयान् ॥ १५५ ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः
लुप्यते इष्ठेमेयस्सु स्थविष्ठः ॥ स्थवीयान् ॥ दविष्ठः ॥ दवीयान् । यविष्ठः ॥ यवीयान् । ह्रसिष्ठः ॥ ह्रसिमा ह्रसीयान्
क्षेपिष्ठः ॥ क्षेपिमा क्षेपीयान् क्षोदिष्ठः ॥ क्षोदिमा । क्षोदीयान् ॥ १५६ ॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदी-
र्घवृंदारकाणां प्रस्थस्फवर्बंहिगवर्षित्रब्द्राघिवृंदाः इष्ठेमेयःसु यथासंख्यं । श्रेष्ठः स्थेष्ठः । स्फेष्ठः ॥ वरिष्ठः
बंहिष्ठः ॥ गरिष्ठः ॥ वर्षिष्ठः ॥ त्रपिष्ठः ॥ द्राघिष्ठः ॥ वृंदिष्ठः । एवमीयसि । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्ते
नेत्यादि ॥ १५७ ॥ बहोर्लोपो भूश्च बहोः परयोरिमेयसोः ॥ आदेः परस्य भूमा भूयान् ॥ १५८ ॥ इष्ठस्य यिट् च
बहोर्भूः भूयिष्ठः ॥ १५९ ॥ ज्यादादीयसः ॥ ज्यायान् ॥ १६० ॥ र ऋतो हलादेर्लघोः ॥ इष्ठेमेयःसु प्रथिष्ठः ॥ प्रथिमा
प्रथीयान् ॥ १६१ ॥ विभाषर्जोश्छंदसि र ऋत इष्ठेमेयःसु त्वं रजिष्ठमनुनेषि पंथां । ऋजिष्ठं वा ॥ १६२ ॥ प्रकृ

35

त्यैकाच्। इष्ठेमेयः सु। स्त्रजिष्ठः॥ स्त्रजीयान॥१६३॥ इनण्यनपत्ये। प्रकृत्या सांकूटिनं। सांराविणं।१६४।गाथिविदथि
केशिगणिपणिनश्च॥ अणिप्रकृत्या। गाथिनो गोत्रापत्यं गाथिनः॥ वैदथिनः॥ कैशिनः॥ गाणिनः॥ पाणिनाः॥१६५॥
संयोगादिश्च॥ इनणिप्रकृत्या। चाक्रिणः॥ शांखिनः॥१६६॥ अन॥ अणि प्रकृत्या। चार्मणोरथः॥ सामनः॥ सौत्वनः
१६७॥ येचाभावकर्मणोः॥ अन्प्रकृत्या तद्धिते॥ राजन्यः॥ ब्रह्मण्यः॥ भावकर्मणोस्तु राज्यं॥१६८॥ आत्माध्वानौ
खे। प्रकृत्या। आत्मने हितमात्मनीनं॥ अध्वनीनं॥१६९॥ नमष्टवर्णेपत्ये ऽवर्मणः॥ अनणिप्रकृत्या। भद्रसाम्नो
ऽपत्यं भाद्रसामः॥ सुषामः॥ अवर्मणः किं॥ चाक्रवर्मणः॥१७०॥ ब्राह्मोजातौ। योगविभागः कर्त्तव्यः॥ ब्राह्म इति नि
पात्यते ऽनपत्ये णि॥ ब्राह्मं हविः॥ ततो ऽजातौ॥ अपत्ये जातावणि ब्रह्मण ष्टिलोपो न। ब्रह्मणो ऽपत्यं ब्राह्मणः
अनपत्ये तु ब्राह्मी ओषधीः॥१७१॥ कार्मस्ताच्छील्ये। निपात्यते। अन्यत्र कार्मणः॥१७२॥ औक्षमनपत्ये
निपात्यते॥ औक्षं पदं॥१७३॥ दांडिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्याधैवत्यस

राम।
॥३६॥

रवैक्ष्वाकमैत्रेयहिरण्मयानि · निपात्यंते ॥ १७४ ॥ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिछंदसि · निपात्यंते
ऋत्व्यं ॥ वास्त्व्यं · वास्त्वं · माध्वीर्गावः ॥ हिरण्ययेन सविता रथेन ॥ १७५ ॥ इति पाणिनिसूत्राणां मितवृत्त्यर्थसं
ग्रहे · पादश्चतुर्थोऽध्यायस्य षष्ठस्यायं समर्थितः ॥ समाप्तः षष्ठोऽध्यायः ॥ ६ ॥ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

36

व्याकरणपाणिनिसूत्रव्याख्या

१००

